॥ श्रीः ॥

★ माधवख्यातिः ★

समीक्षा चक्रवर्ति—
स्व० पं० मधुसूदनशर्म मैथिलः ।

माननीय श्री गोपालस्वरूप पाठक,
उप-राष्ट्रपति,
भारतीय गणराज्य

को

विद्यावाचस्पति पं० मधुसूदनजी ओझा

की

१०८वीं जन्मतिथि के अवसर पर

सादर भेंट ।

शान्ता शर्मा

(शांता शर्मा)
पौत्री
स्व.पं. मधुसूदनजी ओझा,
जयपुर ।

:० श्री: ०:

पुराणसमीक्षायां–देवयुगाभासे

★ माधवख्यातिः ★

समीक्षाचक्रवर्ति, विद्यावाचस्पति, महामहोपदेशक
विद्वद्वर्य स्व० पं० श्रीमधुसूदनशर्म मैथिलेन
विरचिता ।

—:❀:—

तत्सूनुना पं० श्री प्रद्युम्नशर्म्मणा संपादिता ।

———

सेयं

अलवर मही मंडला खंडल प्रधान न्याय सचिवेन विद्यावारिधि
पं० श्री रामभद्रजी ओझा महोदयेन स्वकीयद्रव्येण
मुद्रापयित्वा प्रकाशिता ।

प्रथमावृत्तिः | वि० संवत् २००६ | मूल्यम् १)

सर्वेधिकाराः संपादकाधीनाः ।

॥ श्रीः ॥

भूमिका

स्वर्गीय पूज्य पिताजी का ग्रन्थ समुदाय चार भागों में विभक्त है। ब्रह्म विज्ञान, यज्ञ विज्ञान, पुराण समीक्षा (इतिहास) और वेदाङ्ग समीक्षा उनमें यह प्रकृतग्रन्थ इतिहास विभाग का है।

क्षत्रिय महाराजाओं के इतिहास में सूर्यवंश और चन्द्रवंश नाम की दो शाखायें पुराणों में अति-प्रसिद्ध हैं उनमें चन्द्रवंश का पुराणों में बहुत विस्तृत वर्णन हुआ है। बीच बीच में शाखा भेद और पाठ भेद के कारण इस वंश के निरूपण में इतनी जटिलता आगई है कि पुराण को पढ़ने से कौन किस शाखा का है यह समझना अति कठिन होजाता है। प्रकृत ग्रन्थ में इसी ग्रन्थि को सुलझाने का प्रयत्न हुआ है। इसमें यदुवंश की पृथक् पृथक् पीठिका बनाकर उनका गद्य में विवरण दिया है और पुराणों के पाठ भेदों पर युक्ति-युक्त विस्तृत विवेचन किया है। भगवान् श्रीकृष्ण का वंश विस्तार जानने के लिये यह छोटीसी पुस्तक परम उपयोगी है।

पाठक देखेंगे कि इस वंश में मधु नाम के एक अति प्रसिद्ध महाराजा आते हैं उनका वंश विस्तार आगे बहुत है इन ही के कारण यादव वंश का बहुत बड़ा भाग माधव नाम से प्रसिद्ध हुआ है। भगवान् कृष्ण भी इसी वंश में होने के कारण माधव नाम से बहुत प्रसिद्ध हैं। ग्रन्थकार ने भी इस वंश की महत्ता के कारण इस ग्रन्थ का नाम 'माधव ख्याति' रक्खा है।

भगवान् कृष्ण का विस्तृत चरित्र भगवद्गीता विज्ञान भाष्य के तृतीय काण्ड में आ चुका है जो कि प्रकाशित हो चुका है। इस ऐतिहासिक प्रकरण में भी ग्रन्थकार ने कृष्ण चरित्र विस्तार से लिखा है जो कि क्रमशः प्रकाशित होगा। उस चरित्र के समझने में इस ग्रन्थ का विशेष उपयोग है इसलिये इसे शीघ्र प्रकाशित कर दिया गया है, आशा है इससे जिज्ञासुजन लाभ उठावेंगे।

इस पुस्तक के मुद्रित कराने का श्रेय अलवर राज्य के भूतपूर्व प्रधान न्याय सचिव विद्यावारिधि पण्डित श्री रामभद्रजी ओझा एम. ए. एल. एल. बी. महोदय को है। आप संस्कृत तथा इंग्रेजी के उच्चकोटि के विद्वान तो हैं ही आपको पूज्य पण्डितजी महाराज (ग्रंथकर्त्ता) के ग्रन्थों का भी बहुत ही अनुराग है, कई विषय तो आपके कंठस्थ हैं साथ ही आपके हृदय में उक्त पण्डितजी का अत्यन्त सम्मान तथा श्रद्धा है। आप उनको गुरुवत् मानते हैं और बड़ी भक्ति रखते हैं।

ओझाजी के पूर्वज अलवर राज्य में पूर्ण प्रतिष्ठित होते चले आये हैं उस सिलसिले में जो आपके पूर्वजों को राज्य से जीविका मिली थी उस पर आप यथावत् प्रतिष्ठित हैं और आप अलवर के उच्च सामन्तों में हैं।

आपने जो यह 'माधव ख्याति' नामक पुस्तक छपवाकर पूज्य पंडितजी के ग्रन्थ समुदायों के प्रकाशन में हाथ बटाया है साथ ही यह लोक सेवा भी की है इसके लिये हम आपके बडे कृतज्ञ हैं।

जयपुर

पौ० शु० १५ वि० सं० २००६

संपादक।

तकरीर

समीक्षाचक्रवर्ती

स्वर्गीय पं. मधुसूदनजी ओझा विद्यावाचस्पति।

"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बंबई. ४.

॥ श्रीः ॥

* माधव ख्यातिः *

चन्द्रवंशः पञ्चशाखः शाखा तत्रास्य यादवी ।
इयं वितन्यतेऽनेकप्रशाखाभिरलङ्कृता ॥ १ ॥

अथ यदुवंशः प्रदर्श्यते । हरिवंशादिपर्वणस्त्रयस्त्रिंशे, ब्रह्मस्यैकादशे पाद्मसृष्टिखण्डस्य द्वादशे, वैष्णवचतुर्थांशस्यैकादशे, भागवतनवमस्कन्धस्य त्रयोविंशे, लैङ्गस्याष्टषष्टितमे, कौर्मपूर्वार्द्धस्य द्वाविंशे, मात्स्यस्य त्रिचत्वारिंशे, ब्रह्माण्डोपोद्घातस्योनसप्ततितमेऽध्याये यदुवंशो निरूपितः । लेखकप्रमादात् कालेन तेषु बहवः पाठास्त्रुटिता अन्यथात्वं गमिताश्च दृश्यन्ते । चिररात्राय दृढमूलतां गतानाँ तेषां पाठभेदानां याथार्थ्यस्येदानीं निर्द्धारयितुमशक्यतया तद्विवेचनमकृत्वैवात्र मतभेदरूपेण ते पाठाः पृथक् पृथक् प्रदर्श्यन्ते ॥ १ ॥

अस्य यदोः पूर्वे पुरुषा × ब्रह्मादयोऽष्टौ कथ्यन्ते । ते यथा—

आसीत् पुरायुगे हिमालयादन्तरतः सुमेरुप्रदेशे ऋषिपितृदेवतिर्यङ्मनुष्यभेदैः पञ्चधा विभक्तानां पञ्चजनसंज्ञया प्रसिद्धानां नरजातिविशेषाणां मूलपुरुषः कश्चिद् ब्रह्मा देवः । ब्रह्मदेवस्य मानसः पुत्र आसीदत्रिर्नाम । स ब्राह्मणो महर्षिः पितृजातीय आसीत् । अत्रेः पुत्रः सोमो देवः । स क्षत्रियो ब्राह्मणानां राजासीत् । सोमदेवस्य पुत्रो बुधदेवः । बुधदेवस्य पुत्र आसीत् पुरूरवा नाम । स ऐल ऐलेयो वाऽख्यायते । इल हीयं पुरूरवसो माता वैवस्वतमनोर्ज्येष्ठा कन्यासीत् । तेन सा मानवी । तस्यां जातः स पुरुरवा ऐलः सोमवंश्यानां मनुष्याणां प्रथमो मनुष्य आसीत् । पुरूरवसः पूर्वे ब्रह्मात्रिसोमबुधाश्चत्वारः पुरुषा देवजातीया आसन् ।

× १–ब्रह्मा, २–अत्रिः, ३–सोमः, ४–बुधः, ५–पुरूरवाः, ६–आयुः, ७–नहुषः, ८–ययातिः ।

पुरूरवसमारभ्य तु मनुष्या इष्यन्ते । पुरूरवसः पुत्र आयुः । आयूराजस्य पुत्रो नहुषः नहुषस्य पुत्रो ययातिर्नाम । त इमे ऐलायुर्नहुषययातयोऽन्यत्र सपरिकरं व्याख्याताः ॥

अथ ययातेर्नाहुषस्य सार्वभौमसम्राजः पुत्रो ज्येष्ठो यदुर्नामासीत् । यदोः सहस्रजित् क्रोष्टा नीलः अञ्जिकः रघुरित्येते पंच पुत्रा बभूवुः । तेषु सहस्रजित् क्रोष्टा इत्येतौ द्वौ वंशकरौ । अतएवास्य यदोर्वंशस्य द्वे पीठिके भवतः ।

तत्राद्या हैहय पीठिका यथा—

१. यदुः	९	६. धर्मनेत्रः	१४	११. दुर्दमः	१९	१६. तालजङ्घः	
२. सहस्रजित्	१०	७. कुन्तिः	१५	१२. कनकः	२०	१७. वीतिहोत्रः	
३. शतजित्	११	८. साहञ्जः	१६	१३. कृतवीर्य्यः	२१	१८. अनर्तः	
४. हैहयः	१२	९. महिष्मान्	१७	१४. अर्जुनः	२२	१९. दुर्जयः	
५. धर्म्मः	१३	१०. भद्रश्रेण्यः	१८	१५. जयध्वजः	२३	२०. सुप्रतीकश्चेति	

हरिवंशब्राह्मपाद्मेषु सहस्रजितः स्थाने सहस्रदः पठ्यते । तस्य क्रोष्टा, नीलः अञ्जिकः, पयोदः—इति चत्वारो भ्रातरो हरिवंशे ब्राह्मे च । क्रोष्टा, नीलः, अञ्जिकः, रघुरिति चत्वारः पाद्मे । क्रोष्टुः, नलः, नहुषः, इति त्रयो वैष्णवे । क्रोष्टा, नलः रिपुरिति त्रयो भागवते । क्रोष्टुः, नीलः, लघुरित्येषां त्रयाणां साम्येऽपि चतुर्थोऽञ्जिकः, कौर्म्म ब्रह्माण्डयोः । अन्तिको मात्स्ये। अजको लैङ्गे ॥ अथ शतजिदयं ब्राह्मे न स्मर्य्यते । शतजितो हैहयो हयो वेणुहय इति त्रयः पुत्राः । हयस्थाने हे हयो वैष्णवे महाहयो भागवते । एवं वेणुहयस्थाने तालहयः पाद्मे ॥ अथ धर्म्मोऽयं पञ्चमो न स्मर्य्यते हरिवंश-ब्राह्म-पाद्म-मात्स्य-ब्रह्माण्डेषु ॥ अथ धर्म्मनेत्रस्थाने नेत्रो भागवते ॥ अथ कुन्तिस्थाने कार्तो हरिवंशब्राह्मयोः ॥ कीर्तिः कौर्म्म-लैङ्गयोः । कृतिरिति केचित् ॥ अथ साहञ्जस्थाने संहतः पाद्ममात्स्ययोः । संजितः कौर्म्मे । सञ्जयो लैङ्गे । संजेयो ब्रह्माण्डे । सहजिद्वैष्णवे । सोहञ्जिर्भागवते ॥ अथ भद्रश्रेण्यस्थाने भद्रसेनः पद्म-भागवत-ब्रह्माण्डेषु । रुद्रश्रेण्यो मात्स्ये । हदश्रेण्य-इति केचित् ॥ दुर्दमः कौर्मे स्मर्य्यते, दुर्द्दमस्थाने दुर्मदः पाठान्तरम् ॥ अथ कनकस्थाने धनकः पाद्म-वैष्णव भागवत-लैङ्गेषु । अन्धकः कौर्म्मे । कनकस्य कृतवीर्य्य, कृतवर्मा, कृतौजाः, कृताग्निरिति

चत्वारः पुत्राः । कृतवर्म्मायं कृतकर्म्मा ब्राह्मे कृतधर्म्मा पाद्मवैष्णवयोः ॥ अथार्जुनस्य चतुर्दशस्य बहवः पुत्रा बभूवुस्तेषु-शूरः शूरसेनः कृष्णः मधुः जयध्वज—इति पञ्चैवो वरिता आसन्नित्याहुः । एषु शूरस्थाने ऊर्जितो भागवते । कृष्णस्थाने वृषसेनो वैष्णवे । वृषभो भागवते । कृष्ण इति केचित् । कृष्णः पाद्ममात्स्यहरिवंशेषु । एवं मधुस्थाने मधुपध्वजो ब्राह्मे । धृष्टो हरिवंश पाद्ममात्स्य कौर्म्मेषु । धृष्ण इति केचित् ॥ अथ तालजङ्घस्य बहुषु पुत्रेषु वीतिहोत्रो भरतश्च प्रसिद्धौ । भरताद्वृषः । वृषान्मधुः । मधोर्वृष्णिप्रमुखा बहवः पुत्रा—इति-ब्राह्म-वैष्णव-लिङ्गेषु ॥ अथानर्तोऽयमनन्तः कौर्म्मे ॥ दुर्जयस्तु दुर्जेयोमात्स्ये । कृष्णादुर्जय इति लैङ्गे ॥

साहञ्जेन राज्ञासाहञ्जनीपुरी निर्म्मितेत्याहुः हरिवंश ब्राह्मादिषु । माहिष्मता तु माहिष्मती पुरी स्थापितेत्याह वैष्णवे । भद्रश्रेण्यो भद्रसेनो वा वाराणस्याः पूर्वो राजाऽऽसीदित्याहुः हरिवंशे मात्स्ये ब्रह्माण्डे च । अथ कार्तवीर्य्योऽयमर्जुनो महाप्रतापी चक्रवर्ती सम्राड् बभूव । स कार्तवीर्य्यार्जुनः । सहस्रार्जुनः सहस्रबाहुरित्येवमनेकधा यशोनामभिर्व्यपदिश्यते । तस्य हि सहस्रबाहुरितिविरुदमासीत् ॥

तस्य यज्ञे वरीदास सनुरूपवर्हणो नाम गन्धर्वो गाथां जगौ—

१—न नूनं कार्तवीर्य्यस्य गतिं यास्यन्ति मानवाः ॥
यज्ञैर्दानैस्तपोभिश्च विक्रमेण श्रुतेन च ॥१॥
येनेयं पृथिवी कृत्स्ना सप्तद्वीपा सपर्वता ॥
सप्तोदधिपरिक्षिप्ता क्षात्रेण विधिना जिता ॥२॥

२—स हि सप्तसु द्वीपेषु खड्गी चक्री शरासनी ॥
रथी द्वीपान्यनुचरन् योगीपश्यति तस्करान् ॥३॥
तस्य राज्ञः प्रभावेण प्रजा धर्म्मेण रक्षतः ॥
अनष्टद्रव्यता राज्ये न शोको न च विभ्रमः ॥४॥

३—पञ्चाशीतिसहस्राणि वर्षाणां स महीमशात् ॥ (८५)
स सर्वरत्न संपूर्णश्चक्रवर्ती बभूव ह ॥५॥

४—तेन सप्तसु द्वीपेषु सप्तयज्ञशतानि वै ॥
निरर्गलानि विधिना कृतानीति श्रुतं मम ॥६॥
सर्वे यज्ञा महाराज्ञस्तस्यासन् भूरिदक्षिणाः ॥
सर्वे काञ्चनयूपास्ते सर्वाः काञ्चनवेदिकाः ॥७॥
सर्वैर्देवैः समप्राप्तैर्विमानस्थैरलंकृता ॥
गन्धर्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥ ८ ॥
५—सम्यगाराधयामास दत्तात्रेयं महामुनिम् ॥
तस्मै दत्ता वरास्तेन चत्वारः कीर्तिवर्द्धनाः ॥९॥
भवेत्सहस्रं बाहूनामधर्मात्तु निवर्त्तनम् ॥
युद्धेन पृथिवीं जित्वा धर्मेणैवानुपालनम् ॥१०॥
संग्रामे वर्तमानस्य वधो वीर्याधिकाद्भवेत् ॥
इत्थं वव्रे कार्तवीर्य्यस्तस्माद्वरचतुष्टयम् ॥११॥
तस्य बाहुसहस्रं तु समरे प्रतियुध्यतः ॥
योगाद् योगेश्वरस्यैव प्रादुर्भवति मायया ॥१२॥
६—एष नागं मनुष्येषु माहिष्मत्यां महाद्युतिः ॥
कर्कोटकसुतं जित्वा पुर्य्यां तत्र न्यवेशयत् ॥१३॥
७—लङ्कायां मोहयित्वैष सबलं रावणं बलात् ॥
निर्जित्य वशमानीय माहिष्मत्यां बबन्ध तम् ॥१४॥
८—पुराणि ग्रामघोषाश्च विषयाश्चास्य सर्वतः ॥
तीव्रभिरग्निभिः सर्वाण्येकदा संप्रजज्वलुः ॥१५॥
ददाह कार्तवीर्य्यस्य पुरुषेन्द्रस्य तस्य हि ॥
प्रभावेण महावह्निः शैलान् कतिवनानि च ॥१६॥
आपवस्य वशिष्ठस्याप्याश्रमं शून्यमुत्तमम् ॥
ददाह तेन संक्रुद्धो वशिष्ठोऽशपदर्जुनम् ॥१७॥
त्वया न वर्जितं यस्मादरण्यं मम हैहय ॥
तस्मात्ते दुष्करं कर्म कृतमन्यो हनिष्यति ॥१८॥

छित्त्वा बाहुसहस्रं ते प्रमथ्य तरसा बली ॥
तपस्वी ब्राह्मणो नूनं त्वां वधिष्यति भार्गवः ॥१९॥
अर्जुनस्य महाबाहो र्यादवस्य महात्मनः ॥
कार्तवीर्य्यस्य यो जन्म हैहयस्यानु कीर्तयेत् ॥२०॥
न तस्य वित्तनाशः स्यान्नष्टं प्रतिलभेत च ॥
वर्द्धन्ते विभवाः शश्वद्धर्मश्चास्य विवर्द्धते ॥२१॥

एष खलु कार्तवीर्य्यार्जुनः सार्वभौमो न्यूनातिरेक भावितानि पञ्चाशीति वर्षाणि राज्यं चक्रे—इत्याहुः ॥

अथ जयध्वजो विष्णुभक्तिं प्रवर्तयामास। अन्येतु शूरवृषणादयश्चत्वारस्तस्य भ्रातरः कुलक्रमागतरीत्या शिवभक्ता एवासन्। तेषामत्रोपासनासंबन्धेन जयध्वजेन सह भूयान् विचारो विवादश्च प्रववृते इत्युक्तं—पुराणे। जयध्वजोऽयमवन्तीपतिरासीदिति ब्राह्मलैङ्गमात्स्यादिषु स्मर्यते। शूरसेन सम्बन्धाद देशाः शूरसेनाः। अनर्त सम्बन्धात्वानर्ता देशाः। वाराहस्य दशमैकादशयोर्दुर्जयसुप्रतीकचरितं स्मर्य्यते॥ तत्रायं सुप्रतीकः काशिराज आसीत्। दुर्जयस्तु सुप्रतीक पुत्र इति स्मर्य्यते। तथाहि—

आसीत् कृतयुगे राजा सुप्रतीको महाबलः ॥
विद्युत्प्रभा कान्तिमती द्वे तद्भार्ये बभूवतुः ॥ १ ॥
एकस्यामपि भार्य्यायां न स लेभे सुतं नृपः ॥
आत्रेयं तोषयामास चित्रकूटे स्थितं मुनिम् ॥ २ ॥
(दत्तात्रेयः कुलगुरुः)

सऋषिस्तोषितस्तेन दीर्घकालं वरार्थिना ॥
उवाच राजन् पुत्रस्ते भविता दृढविक्रमः ॥ ३ ॥
अथ राजा सुप्रतीको भार्य्यायां गर्भमावहत् ॥
विद्युत्प्रभायां धर्मज्ञः सा च काले त्वसूयत ॥ ४ ॥
(सुप्रतीकः राजा काशिराजः विद्युत्प्रभा राज्ञी दुर्जय सुद्युम्नौ पुत्रौ।)

तस्यां पुत्रः समभवद्दुर्जयाख्यो महाबलः ॥
जातकर्मादिसंस्कारं तस्यात्रेयो मुनिर्व्यधात् ॥ ५ ॥
कान्तिमत्यायथान्यस्यां पत्न्यामप्यभवत् सुतः ॥
सुद्युम्नो नाम तावास्तां धर्मात्मानौ प्रतापिनौ ॥ ६ ॥
अथ कालेन महता वाराणस्यधिपोबली ॥
सुप्रतीकः सुतं दृष्ट्वा दुर्जयं योग्यमन्तिके ॥ ७ ॥
दत्वास्य राज्यं मनुश्चित्रकूटगिरिं ययौ ॥
दुर्जयस्तु मनश्चक्रे राज्यं वर्द्धयितुं तदा ॥ ८ ॥
आदाय विपुलं सैन्यमुत्तरां दिशमास्थितः ॥
सर्वानुत्तरतो देशान् विजिग्ये दुर्जयो नृपः ॥ ९ ॥
किंनरं हरिवर्षं च रम्यरोमावतं कुरुम् ॥
इलावृत्तं मेरुमध्यं भद्राश्वं च जिगायसः ॥ १० ॥
तत्कृतं विलयं स्वर्गे शशंसेन्द्राय नारदः ॥
आययौ दुर्जयं हन्तुमिन्द्रः क्षिप्रं सलोकपः ॥ ११ ॥
दुर्जयस्तु सुरान् जित्वा निवृत्तो गन्धमादने ॥
चक्रेऽवस्थितसंभारं स्कन्धावारनिवेशनम् ॥ १२ ॥
सजयी लोकपालानां सर्वेषामेव कर्म्मसु ॥
विद्युत्सुविद्युतौ नामासुरौ तत्र न्यवेशयत् ॥ १३ ॥
अथैष दुर्जयोऽपश्यन्मन्दरोपरि संभ्रमन् ॥
कन्ये द्वे तापसी च द्वौ धनदस्य वनान्तरे ॥ १४ ॥
अवतीर्य द्विपात्तूर्णमुपविष्टो वरासने ॥
पृष्टः प्रोवाच राजासौ तापसौ तत्पुरस्कृतः ॥ १५ ॥
सुप्रतीकस्य पुत्रोऽहं दुर्जयः पृथिवीश्वरः ॥
विजित्य पृथिवीं सर्वामागतोऽस्मि ध्रुवं प्रति ॥ १६ ॥
कौ भवन्ताविमे च द्वे कन्यके भवदन्तिके ॥
इति पृष्टौ तापसौ तावूचतुः पृथिवीश्वरम् ॥ १७ ॥

आवां हेतुप्रहेत्राख्यौ मनोः स्वायम्भुवः सुतौ ॥
आवां देवविनाशाय गतौ स्वो मेरुपर्वतम् ॥१८॥
तत्रावयोर्महासैन्यं जिगाय सकलान् सुरान् ॥
असुरैर्निर्जिता देवा विष्णुं शरणमाययुः ॥१९॥
ततः स बहुधात्मानं चक्रे मत्सैन्यमागतः ॥
ददृशे मायया तत्र शतधन्या च सहस्रधा: ॥२०॥
यः कश्चिदसुरो राजन्नावयोर्बलमाश्रितः ॥
स हतः पतितो भूमौ दृश्यते गतचेतनः ॥२१॥
एवं तत्सहसा सैन्यमासुरं तस्य मायया ॥
सर्वं विनिहतं दैवादावां तत्रावशेषितौ ॥२२॥
त्वं चास्मन्मित्रतनयः सुप्रतीकात्मजो: नृपः ॥
स इमे आवयोः कन्ये गृहाण पुरुषर्षभ ॥२३॥
सुकेशी हेतुकन्येयं मिश्रकेशी प्रहेतृजा ॥
ते लब्ध्वा दुर्जयो राजा हृष्टः स्वं राष्ट्रमाययौ ॥२४॥
सुकेश्याः प्रभवः पुत्रो मित्रकेश्याः सुदर्शनः ॥
स राज्यं दुर्जयो राजा लब्ध्वा पुत्रद्वयं शुभम् ॥२५॥
स्वयं कालान्तरे श्रीमान् जगमारण्यमन्तिके ॥
तत्रापश्यत्तपस्यन्तं नाम्ना गौरमुखं मुनिम् ॥२६॥
तस्य प्रविष्टस्य ततो राज्ञः परमहर्षितः ॥
कृत्वा पूजामुवाचेन्द्र तदा गौरमुखोमुनिः ॥२७॥
राजन् बाहाः प्रमुच्यन्तां भोज्यान्नं सानुगस्य ते ॥
यथाशक्ति प्रदास्यामि विशिष्टोऽस्यतिथिर्मम ॥२८॥
अर्चो हिरण्यः पश्च तस्य बलं तत्र सहस्थितम् ॥
निमन्त्र्य दुर्जयं विप्रश्चिन्तयामास भोजनम् ॥२९॥
विष्णुदत्तो मणिश्चासीच्चित्तसिद्धिश्च तस्य हि ॥
तत्प्रभावात्तापसोऽसौ चक्रे राजपुरस्क्रियाम् ॥३०॥

नगरं निर्ममे तत्र गृहाणि विविधान्यपि ॥
प्राकाराणि तथोपान्ते तद्वन्नोद्यानकानि च ॥३१॥
हस्तिनां हस्तिशालां च तुरगाणां च मन्दुराः ॥
चकार संचयान् भक्ष्यभोज्याद्यन्नस्य सर्वशः ॥३२॥
चिन्तयामास राजेन्द्रो विस्मयाविष्टचेतनः ॥
किमेदं मुनेरामर्थ्यं तपसोऽथवा मणेः ॥३३॥
सुखं स राजा बुभुजे सभृत्यबलवाहनः ॥
सुखं च निशि सुष्वाप वरस्त्रीगणसेवितः ॥३४॥
एवं तदनुगाः सर्वे भुक्तभोग्या यथारुचि ॥
ऋषेस्तस्य प्रभावेण हृष्टाः प्रसुषुपुस्तदा ॥३५॥
ततो रात्र्यां व्यतीतायां स राजा ताः स्त्रियोऽखिलाः ।
तत्पुरं तानि वेश्मानि न दृष्ट्वातिविसिष्मिये ॥३६॥
कथमेष मणिर्मह्यं भवेदेते विचिन्त्य सः ॥
हराभि श्वेते निश्चित्य प्रयाणमकरोत्ततः ॥३७॥
आश्रमस्य बहिर्गत्वा नातिदूरे स दुर्जयः ॥
मन्त्रिणं प्रेषयामास विरोचनमिहाश्रमे ॥३८॥
स मन्त्री सहसोपेत्य तं मुनिं निजगाद ह ॥
रत्नानां भाजनं राजा मणिस्तस्मै प्रदीयताम् ॥३९॥
श्रुत्वा गौरमुखः क्रुध्यन् स विरोचनमब्रवीत् ॥
नार्तवद्याचते राजा मा त्वां लोकोऽत्यगादिति ॥४०॥
अथ दूतमुखाद्राजा श्रुत्वा मुनिवचस्तदा ॥
क्रुध्यन्नाज्ञापयन्नीलं गृह्यतां स मणिर्बलात् ॥४१॥
नीलो गत्वाग्निशालायां दृष्ट्वा तं मणिमाहितम् ॥
यावद् ग्रहीतुं यतते तावद् दृष्ट्वा महाभटाः ॥४२॥
सरथाः सध्वजाः साश्वाः सवर्णाः सासिचर्मिणः ॥
सधनुष्काः सतूणीरा योधाः परमदुर्जयाः ॥४३॥

निश्चेष्टस्तं मणिं भित्त्वा व्यक्रामन्त यतस्ततः ॥
योधयामासुरव्यग्रा विविधायुधपाणयः ॥४४॥
हते विरोचने राजा बलेन स्वयमाययौ ॥
राज्ञोऽपि मणिजैर्वीरैर्दर्शितं क्रन्दनं महत् ॥४५॥
ततो हेता प्रहेता च श्रुत्वा मामान्तरं रणे ॥
युध्यमानं समायातौ साहाय्यार्थं त्वरान्वितौ ॥४६॥
अक्षौहिणी परीवारा वीराः पञ्चदशासुराः ॥
पृथक् पृथक् त्वदादिष्टा सेनाध्यक्षाः समाययुः ॥४७॥
दुर्जयस्य महामायाः सैनिकास्ते महासुराः ॥
ययुर्युधि मणिजैः सार्द्धं महासैन्यपरिच्छदाः ॥४८॥
इत्थं स सङ्गरो घोरो महांस्तेषां व्यवर्द्धत ॥
तं दृष्ट्वा स मुनिर्द्वारि चिन्तासंलग्नचेतनः ॥४९॥
ततश्चक्रेण तत्सैन्यमसुरैर्दुर्जयं बलात् ॥
निमेषान्तरमात्रेण समग्रं भस्मसात् कृतम् ॥५०॥
सुप्रतीकोऽपि तत्छ्रुत्वा दुर्जयादिनिपातनम् ॥
विरक्तश्चित्रकूटाद्रौ राघवेन्द्रे लयं ययौ ॥५१॥ इति ॥

पितापुत्रयोः क्रमविसंवादात् काशिराजत्वाख्यानाच्च तयोर्दुर्जय सुप्रतीकयोर्हैहयवंश्यत्वे क्षत्रवृद्धवंश्यत्वे वा संदेहः ॥ अयं तावत् सुप्रतीको राजा यदुतो विंशः । स पुरूरवसश्चतुर्विंशः । स पुनर्ब्रह्मतोऽष्टाविंशः । एव मुत्तरत्रापि सर्वत्र यद्रूपक्रमसंख्यायाश्चतुराधिक्ये ऐलोपक्रमसंख्याया अष्टाधिक्ये तु ब्रह्मोपक्रमसंख्या निष्पद्यते इति भाव्यम् ॥

त एते हैहया नाम यादवास्त्रिविधा मताः ॥
तालजङ्घा माधवाश्च वृष्णयश्च पृथग्विधाः ॥१॥
अथैषां तालजङ्घानां हैहयानां महात्मनाम् ॥
पृथक् सप्तगणाः ख्याता दक्षिणां दिशमास्थिताः ॥२॥
सुजाताः सुव्रता भोजा वीतिहोत्रा अवन्तयः ॥
भरतास्तुण्डिकेराश्च तालजङ्घा इमे मताः ॥३॥

॥ इति यदुवंशे हैहयशाखावंशः ॥

अथ यदुवंशे द्वितीया ज्यामघः पीठिका यथा—

१. यदुः	९	७. शशबिन्दुः	१५	१३. मरुतः	२१
२. क्रोष्टा	१०	८. पृथुश्रवाः	१६	१४. कम्बलबर्हिः	२२
३. वृजिनीवान्	११	९. पृथुतमः	१७	१५. रुक्म कवचः	२३
४. स्वाहिः	१२	१०. सुयज्ञः	१८	१६. परावृत्	२४
५. कुशाङ्कः	१३	११. उशनाः	१९	१७. ज्यामघः	२५
६. चित्ररथः	१४	१२. शितेषुः	२०	१८. विदर्भश्चेति ॥	२६

क्रोष्टा क्रोष्टुरिति च व्यपदिश्यते प्रायेण ॥ अथ वृजिनीवतः स्थाने वृजिनवान् भागवत-ब्रह्माण्डयोः । वज्रवान् कौर्म्मे । ध्वजिनीवान् वैष्णवे ॥ अथ स्वाहिस्थाने तालव्यशकारेण-श्वाहिर्भागवते । स्वाहोमात्स्ये । स्वातिः पाद्मवैष्णवयोः । स्वाती लैङ्गे । शान्तिः कौर्म्मे ॥ अथ कुशाङ्कस्थाने कुशं लैङ्गपाद्मयोः । कुशकः कौर्म्मे । रुशकुर्वैष्णवे । रुशेकुर्भागवत ब्रह्माण्डयोः । रूपंकुर्मात्स्ये । रुपद्गुर्ब्राह्महरिवंशयोः ॥ अथ शशबिन्दुर्महाभोज इति भागवते । स हि यदोः सप्तमो ब्रह्मणस्तु पञ्चदशः । अयं सम्राडासीत् । तस्य कीर्तिश्लोका भवन्ति—

शशबिन्दुर्महायोगी महाभोजो महानभूत् ॥
चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ १ ॥
चक्ररथो मणिः खड्गं चर्म्मरत्नं च पञ्चमम् ॥
केतुर्निधिश्च सप्तैव प्राणहीनानि चक्षते ॥ २ ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्चयः ॥
पत्यश्वाः कलभाश्चैव प्राणिनः सप्त कीर्त्तिताः ॥ ३ ॥
चतुर्दश हि रत्नानि सर्वेषां चक्रवर्तिनाम् ॥
स सर्वरत्न भोगाढ्यः शशबिन्दुरजायत ॥ ४ ॥
तस्य पत्नीसहस्राणि दशासन् भूरितेजसः ॥
÷ दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ॥ ५ ॥

÷ अत्र सहस्रलक्षशब्दोऽसंख्यातोपलक्षणम् ॥

शशबिन्दुः परंवृत्तं राजर्षीणामनुष्ठितः ॥
चक्रवर्ती महासत्त्वो महावीर्यो बहुप्रजाः ॥ ६ ॥

शशबिन्दोः पृथुश्रवाः पृथुदानः पृथुकीर्त्तिः पृथुञ्जयः पृथुकर्म्मा, पृथुयशाः—इति षट् पुत्राः ॥ तत्र पृथुदानपृथुञ्जयपृथुकर्म्मणां स्थाने पृथुमत पृथूद्भव-पृथुतेजसः पठ्यन्ते पाद्मे । मात्स्येतु तेषां स्थाने पृथुमतः पृथुञ्जयपृथुधर्म्माणः । एषां पृथुश्रवाः श्रेष्ठो वंशकरः पृथुश्रवः स्थानेऽनन्तको लैङ्गे । कौर्म्मेतु शशबिन्दोः पुत्रः पृथुयशाः तस्य पुत्रः पृथुकर्म्मा तस्य-पृथुजयः, तस्य पृथुकीर्त्ति तस्य पृथुदानः । तस्य पृथुश्रवाः इत्येव षडप्येतान् पितापुत्र-क्रमेण स्मरन्ति । तन्मते पृथुश्रवा अयं शशबिन्दोः सप्तमः मतान्तरे तु द्वितीय इति विशेषः ॥ अथ पृथुतमः पाद्मे न स्मर्यते हरिवंशे तु पाथुं श्रवसो नाम्नानोल्लिख्यते पृथुनाम स्थाने पृथु-सत्तमः कौर्म्मे भागवते । अन्तरो ब्रह्म-मात्स्या ब्रह्माण्डेषु । अनन्तरो हरिवंशे इति केचित् । यज्ञो लैङ्गे ॥

अस्य खलु शशबिन्दोरतितरां वंशवृद्धिरभवत् । असंख्याता एव तस्य ताः प्रजास्तदात्वे सर्वतः पृथिव्यामितस्ततो व्याप्नुवन् । ताश्च सर्वाः प्रजास्तमेवैकं शशबिन्दुं प्रजापतिं मेनिरे । तमेवार्चयन्तस्म न त्वन्यं ते प्रजापतिमभ्युपागच्छन् । तदुक्तं भारतमोक्षधर्म्मे—

"शशबिन्दोश्च भार्याणां सहस्राणि दशाच्युत ।
एकैकस्यां सहस्रं तु तनयानामभूत्तदा ॥ १ ॥
एवं शतसहस्राणि दश तस्य महात्मनः ॥
पुत्राणां च न ते कश्चिदिच्छन्त्यन्यं प्रजापतिम् ॥ २ ॥
प्रजामाचक्षते विप्राः पुराणाः शशबिन्दवीम् ॥
स वृष्णिवंशप्रभवो महावंशः प्रजापतेः ॥ ३ ॥ इति (भार० शान्ति० २०८) ।

अथ सुयज्ञः पाद्म-वैष्णव-भागवत-कौर्म्मेषु न स्मर्यते । सुयज्ञस्थाने धृतिः पठ्यते लैङ्गे ॥ अथ य उशनाः स उषतो ब्राह्मे ॥ अथ शितेषु स्थाने दन्त्यसकारेण सितेषुर्लैङ्गे । शितेषुर्ब्राह्मपाद्मयोः । शितषुर्वैष्णवे । तितिक्षुर्मात्स्ये ॥ अथ मरुतो मरुत इति पाठान्तरम् । मरुतः पाद्म-वैष्णव-भागवत-कौर्मेषु न स्मर्यते । कम्बल बर्हिरपि पाद्म वैष्णव-भागवत-कौर्म्मेषु न स्मर्यते ॥ अथ रुक्मकवचस्थाने रुचको भागवते ॥ अथ परावृदयं भागवत-मात्स्ययो-

र्नस्मर्य्यते । परावृतः स्थाने पराविद्ब्रह्माण्डे । परावृत्तः कौर्म्मे । परजिद्ब्राह्मे ॥ अस्य परावृतो रुक्मेषु, पृथुरुक्मः, ज्यामघः, परिघः हरिरिति पञ्चपुत्रा अभूवन् । तेषु ज्यामघ भिन्ना न स्मर्य्यन्ते कौर्म्मे । पृथुरुक्मस्थाने पृथुर्वैष्णव भागवतयोः । परिघस्थाने पालितो ब्राह्मे । वलितो वैष्णवे । पुरुजिद्भागवते एवं हरिस्थाने हरितो वैष्णवे । रुक्मो भागवते ॥ अत्र परावृतः स्थाने पुरुजितं पठित्वा तद्भ्रातृत्वेन ज्यामघः पठ्यते भागवते न तु पुत्रत्वेनेति केचिदाहुः ॥ अत्र ज्यामघस्य कीर्तिश्लोका भवन्ति—

परिघं च हरिं चैतौ विदेहेभ्यः[1] पिता ददौ ।
रुक्मेषुरभवद्राजा पृथुरुक्मस्तदाश्रयः ॥ १ ॥
ताभ्यां[2] प्रव्राजितो राजा ज्यामघोऽवसदाश्रमे ॥
क्वचिद्वने कुटिं कृत्वा कंचित्कालं सुदुःखितः ॥ २ ॥
प्रशान्तः स तदा राजा ब्राह्मणैरवबोधितः ॥
जगाम धनुरादाय देशमन्यं रथी ध्वजी ॥ ३ ॥
नर्मदाकूलमेकाकी मेकलाद् गिरिकाननम् ॥
ऋक्षवन्तं गिरिं[4] गत्वा[5] शुक्तिमत्यामुवास सः ॥ ४ ॥
ज्यामघस्याभवद्भार्या शैब्या बलवती भृशम् ॥
तयाऽनुधर्षितो राजा नित्यं तिष्ठति तद्वशे ॥ ५ ॥
भार्य्याभयास्तु ये केचिद्भविष्यन्यथवा मृताः ॥
तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृपः ॥ ६ ॥
अपुत्रा तस्य सा पत्नी शैब्या नाम तथाप्यसौ ॥
अपत्यकामोऽपि भयान्नान्यां भार्य्यामविन्दत ॥ ७ ॥

---

१ विदेहेऽस्थापयत् पितेति पाठान्तरम् ।

२ पराजित इति वा

३ मृत्तिकावतीम् इतिवा वृत्तिकर्षित इतिवा पाठः ।

४ जित्वा ।

५ मुक्तमन्यैरुवासतइतिवा । त्यक्तमन्यैरुपाश्रयदितिवा पाठः ।

सकृच्चिद्विजयी युद्धे शत्रुं निर्जित्य तद्गृहात् ॥
लेभे राजसुतारत्नं संभ्रमान्निर्गते रिपौ ॥ ८ ॥
रथस्थां तां निरीक्ष्याह शैब्या पतिममर्षिता ॥
केयं कुहक मत्स्थानं रथमारोपिता त्वया ॥ ९ ॥
स्नुषा तवेत्यभिहिते हसन्ती पतिमब्रवीत् ॥
वन्ध्याहमसपत्नी च स्नुषामे युज्यते कथम् ॥ १० ॥
अथोप श्रुत्य तद्वाक्यमुवाच ज्यामघस्तदा ॥
यस्ते जनिष्यते पुत्रस्तस्य भार्या भविष्यति ॥ ११ ॥
उग्रेण तपसा तस्याः कन्यायाः सा व्यजायत ॥
पुत्रं विदर्भं सुभगा शैब्या परिणता सती ॥ १२ ॥

अथ विदर्भस्य त्रयः पुत्रा बभूवुः—क्रथ कैशिको रोमपादश्च। तेन ज्यामघवंशे त्रयः शाखावंशाः प्रवर्तन्तेस्म—क्रथादाशार्हाः। कैशिकाश्चैद्याः। रोमपादाद्बभ्रव श्चेति। तत्रादौ बभ्रुपीठिका यथा—

१९	१ रोमपादः	२७	२४	६ कौशिकः	३२	२९	११ वपुष्मान्	३७
२०	२ बभ्रुः	२८	२५	७ कुमन्तः	३३	३०	१२ बृहन्मेधाः	३८
२१	३ धृतिः	२९	२६	८ अनलः	३४	३१	१३ श्रीदेवः	३९
२२	४ श्वेतः	३०	२७	९ श्येनिः	३५	३२	१४ वीतरथः	४०
२३	५ विश्वसहः	३१	२८	१० द्युतिमान्	३६	×	×	

अत्र रोमपादस्थाने लोमपादो वायु-पाद्म-कौर्म्म-मात्स्य-ब्रह्माण्डेषु। बभ्रुस्थाने स्नुषास्थे। धृतिस्थाने सुधृतिर्लैङ्गे। कृतेर्भागवते। आकृतेर्ब्रह्माण्डे। आहृतिर्हरिवंशे। ज्ञातेर्मात्स्ये॥ श्वेतस्थाने उशको भागवते। श्वेत प्रभृतयः कौर्मादि ग्रन्थेषु न स्मर्य्यन्ते॥

अथ चैद्यपीठिकायां वंशधरा राजानो नामग्राहं नस्मर्य्यन्ते। तत्र कौशिकाच्चेदिः तद्वंशे चेद्या भूपाला बभूवुः। इह कौशिक स्थाने कौशिकं पठन्ति पाद्मे लैङ्गे च, कुशं भागवते। तदित्थं द्विविधः कौशिको भवति-विदर्भपुत्रो रोमपादभ्राता यः स एकः। रोमपादवंशे षष्ठो यः सोऽन्यः। ताभ्यां पृथग् वंशः—इति पाद्मे ब्रह्माण्डादिषु निरूपितम्—

लोमपादात्मजो बभ्रुधृतेस्तस्य तु चात्मजः ।
कौशिक स्यात्मजश्चेदि स्तस्मा चेद्या नृपाः स्मृताः ॥ १ ॥

क्रथो विदर्भपुत्रो यः कुन्तिस्तस्यात्मजोऽभवत्"–इत्येव त्रयाणां विदर्भपुत्राणां पार्थक्येन वंशाख्यानात्तु कौशिक द्वयस्य परस्यासंक्रमणेनैकीभावात्य मानैः कौशिक वंश्यानां चेदीनां रोमपाद वंश्यत्वमाख्यायते तद्भ्रान्तम् । चेदिस्थाने चिदिर्मात्स्य ब्रह्माण्डयोः ॥ अथ दाशार्ह पीठिका यथा—

१९	१ क्रथः	२७	२७	९ विकृतिः	३५	३५	१७ देवनः	४३
२०	२ कुन्तिः	२८	२८	१० भीमरथः	३६	३६	१८ मधुः	४४
२१	३ धृष्टः	२९	२९	११ नवरथः	३७	३७	१९ कुरुवंशः	४५
२२	४ सृष्टः	३०	३०	१२ दशरथः	३८	३८	२० अनुः	४६
२३	५ निर्धृतिः	३१	३१	१३ शकुनिः	३९	३९	२१ पुरुहोत्रः	४७
२४	६ विदूरथः	३२	३२	१४ कल्मः	४०	४०	२२ अंशुः	४८
२५	७ व्योमः	३३	३३	१५ देवरातः	४१	४१	२३ सात्वतः	४९
२६	८ जीमूतः	३४	३४	१६ देवक्षत्रः	४२	४२	२४ सात्वतश्चेति	५०

अत्र क्रथस्य भीम इति नामान्तरं ब्राह्महरिवंशयोः । धृष्टस्य धृष्टि[illegible] भागवतयोः । रणधृष्टो लैङ्गे । धृष्णिः कौर्मे । अथ सृष्टः पाद्मे पठ्यते न [illegible] । लैङ्गे तु सृष्टस्थाने धृतं पठित्वा कुन्तिधृष्टयोरन्तराले तं पठन्ति । तन्मते धृष्टः क्रथाच्चतुर्थः । अथ निर्धृतिर्मा कौर्मयोर्न स्मर्यते । निधृतिस्थाने निवृतिर्भागवते । निर्वृतिर्मात्स्य ब्रह्माण्डयोः । निवृत्तिः पाद्मे ॥ अथ विदूरथोऽयं दाशार्ह—इति कुलोपाधिसंज्ञां जग्राह । तेन ततः प्रभृति तद्वंश्या दाशार्हा उच्यन्ते । "निवृत्तेपुत्रो दाशार्हो नाम्ना स तु विदूरथः" इति पाद्मोक्तेः ॥ तथा च दाशार्हाणामयं प्रथमो दाशार्हः । मात्स्ये तु—"तदेको निर्वृतेः पुत्रो नाम्ना स तु विदूरथः ॥ दाशार्हस्तस्य वै पुत्रो व्योमस्तस्य च वै सुतः ।"—इति स्मरता विदूरथपुत्रोदाशार्ह इष्यते । तन्मते क्रथात् सप्ततः पञ्चविंशः । मतान्तरे तु चतुर्विंश इति विशेषः ॥ ब्राह्मे तु सृष्टधृत्योरस्मरणाद् धृष्टस्य त्रयः पुत्राः इष्यन्ते—"धृष्टस्य जज्ञिरे शूरास्त्रयः परम धार्मिकाः ।

आवन्तश्च दशार्हश्च वली विदूरथश्च"—इत्युक्तेः। तन्मते सात्वतः क्रथाद्द्वाविंशः इति भाव्यम्॥

अथ क्रथात्कुन्तिस्ततो वृष्णिः। वृष्णेर्नरथादयः—इति स्मरता कौर्मग्रन्थकृता वंशविद्येन सृष्टनिधृत्यादयः सप्तपुरुषा न स्मर्यन्ते। तत्रास्य ग्रन्थो लेखकप्रमादात् त्रुटितः प्रतीयते। अस्यैव विदूरथस्य दशार्हस्य कन्या शुभाङ्गी नाम। सापौरवस्य संवरणपुत्रस्य कुरोर्भार्यासीत्। तस्यां पौरवो विदूरथो जज्ञे इत्याहुः।

अथ यो व्योमः स व्योमा ब्राह्म हरिवंशयोः। व्योमो लैङ्गे। भीमः पाद्मे। अथ विकृति स्थाने बृहतिहरिवंशे। अथ दशरथोऽयं दृढरथो मात्स्ये एवं करम्भस्थाने करम्भिर्वैष्णवभागवतयोः॥ अथायं देवना न स्मर्यते वैष्णव भागवतयोः पाद्मलैङ्ग कौर्मेषु च। अथ देवनस्य देवक्षत्रस्य वा पुत्रो मधुरयं मधूनां वंशकरः। मधोर्वैदर्भ्यां मरुवसा इति वंशे। कुरु शादय श्चत्वारो न स्मर्यन्ते ब्राह्मे। कुरुवंशस्थाने कुरुवंशो लैङ्गे। कुमारवंशो वैष्णवे। कुरुः कौर्मे। पुरुवसुर्मात्स्य ब्रह्माण्डयोः। मरुवसा हरिवंशे। अनुरयं हरिवंश ब्राह्म पाद्मयोर्मात्स्य ब्रह्माण्डयोश्च न स्मर्यते। कौर्मेतु कुरोरनुः सुत्रामा चेति द्वौ पुत्रौ स्मर्यते। अथ पुरुहोत्रस्थाने पुरुमित्रो वैष्णवे। प्रियगोत्रः कौर्मे। पुरुद्वान् हरिवंश ब्राह्म मात्स्य ब्रह्माण्डेषु। अस्य पुरुत्वतः पुरुषोत्तम इत्येषा संज्ञा प्रसिद्धासीत्। अथ पुरुहोत्रस्य द्वयोस्त्यां भद्रवत्यां भद्रसेन्यां वा वैदर्भ्यामंशुर्जज्ञे। अंशुस्थाने अयुरायुर्वा भागवते। जन्तुर्मात्स्ये। पुरुद्वहो ब्रह्माण्डे। कुरुद्वहो हरिवंशे। यत्तु हरिवंशे। 'मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरुद्वह इत्येवमंशुस्थाने मधुशब्दः क्वचित्पाठे दृश्यतेतत्प्रमादात्। माधवस्य कुरुवंशस्य पुत्रत्वेन मधोः पुनः स्मृतः सर्वग्रन्थ द्विरुक्तत्वात्। अथांशोर्वैत्रक्यां सात्वत इति ब्रुवता पाद्मकृता सत्वान् स्मर्यते। पुरुद्वतो वैदर्भ्यां भद्रसेन्यां जन्तुः जन्तोरैच्वाक्यां सात्वत इति ब्रुवता मात्स्यकृताऽप्ययं सत्वान् स्मर्यते। पुरुत्वतो भद्रवत्यां वैदर्भ्यामंशुः। अंशोरैच्वाक्यां सत्वतः सात्वत इति ब्रुवता लैङ्गकृता, पुरुद्वतो भद्रवत्यां पुरुद्वहः। ततो रैच्वाक्यां सत्वस्ततः सात्वत इति ब्रुवता ब्रह्माण्डकृता च सत्वतः स्थाने सत्वा पठ्यते। अन्धकः कौर्मे। ब्राह्मे तु मधोर्वैदर्भ्यां पुरुद्वान्, मधोरैच्वाक्यां सत्वान् इति ब्रुवता पाद्मकृतसत्वतोर्वैमात्रेय भ्रातृत्व मिष्यते। "मधूनां वंशकृद्राजा मधुर्मधुरवागपि। मधोर्जज्ञेऽथ वैदर्भ्यां पुरुद्वान् पुरुषोत्तमः॥१॥ ऐच्वाकी चाभवद् भार्या मधोस्तस्यां व्यजायत। सत्वान् सर्वगुणोपेतः सात्वतां कीर्तिवर्द्धनः॥२॥

इत्युक्तेः। किन्तु बहूना मनुरोधस्य न्यायत्वादिदं ब्राह्ममतमनादेयम्। अथवात्र ब्राह्मे लेख दोषाद् ग्रन्थस्त्रुटितः संभाव्यते।

मधुर्नाम महातेजा, मधोः पुरुवसुस्तथा।
आसीद् पुरुवसोः पुत्रः पुरुद्वान् पुरुषोत्तमः॥ १॥
जन्तुर्जज्ञेऽथवैदर्भ्यां, भद्रसेन्यां पुरुद्वतः।
ऐक्ष्वाकी चाभवद्भार्या, जन्तोस्तस्या मजायत॥
सात्वतः सत्व संयुक्तः, सात्वतां कीर्त्ति वर्द्धनः।
"इत्येवं मात्स्ये पाठदर्शनात्।"
मधूनां वंशकृद्राजा, मधोस्तु कुरुवंशकृः।
कुरुवंशादनुस्तस्मात्, पुरुत्वान् पुरुषोत्तमः॥ १॥
अंशुर्जज्ञेऽथ वैदर्भ्यां, भद्रवत्यां पुरुत्वतः।
ऐक्ष्वाकीमहहच्चांशुः, सत्त्वस्तस्माद्जायत॥ २॥
सत्वात् सर्वगुणोपेतः, सात्वतः कुलवर्द्धनः॥

इत्येवं लैङ्गेऽन्यत्र च दृश्यमानैर्ग्रन्थपाठैः साम्यदृष्टौ ब्राह्मे ग्रन्थ त्रुटेः स्पष्टं प्रतिपत्तेरिति भाव्यम्॥

इत्थं चास्मिन् ज्यामघवंशे त्रयः शाखा वंशा व्याख्याताः यदुवंशः, चैद्यवंशः, दाशार्हवंशश्चेति। अथोपरिष्टादन्यो यदुवंशो व्याख्यास्यते। तत्रोपेनायं प्रथमो यदुवंशो विदर्भवंश इत्याख्यायते।

अथास्य सात्वतस्य कौशल्यायां सप्त पुत्रा बभूवुः—भजनः, भजमानः, दिव्यः देवावृधः, अन्धकः, महाभोजः, वृष्णिरिति। अत्र भजनोदिव्यश्च कौर्मे न स्मर्येते। भजनो वैष्णवे पठ्यते लैङ्गे भ्राजमानः। ब्राह्मभागवतयोर्भजिः। मात्स्ये हरिवंशे च भजिनः। ब्राह्मे तु भागिनो भाजिनो वा। महाभोजो महाभुजो महाबाहुरित्येकार्थाः। हरिवंशे महाभोजस्त्वन्ध

महाबाहोरेवल्लेखात् भजनो दिव्यश्चानमत्यौ । केचित्तु भजनो भजमान इत्येकोऽर्थः । दिव्यो देवावृध इत्येकः । अन्धको महाबाहु रित्येकः । वृष्णिरित्येकः । तदेवं चत्वार एव सात्वतस्य पुत्रा बभूवुर्नतु सप्तेत्याहुः । तेनैतस्मिन् दाशार्हवंशे चत्वारः शाखावंशा अनुवर्तन्ते । भजमानाद्देवा वृधादन्धकाद्वृष्णेश्चेति ।

(१)

तत्र भजमानोऽयं ब्रह्मण एकपञ्चाशो यदोस्तु त्रिचत्वारिंशः भजमानस्य सृञ्जयसुते द्वे भार्ये आस्ताम् बाह्यका उपबाह्यकावेति बाह्यकाया सृञ्जय्यां क्रिमिः कृपणः, धृष्टः, शूरः, पुरञ्जय इति पञ्चपुत्राः उपबाह्यकायां तु सृञ्जय्यामयुताजित्, सहस्राजित् शताजित्, दासक इति चत्वारः पुत्राः इति ब्राह्मे ॥ १ ॥ बाह्यकायां निमिः । कृपणोवृष्णिरितित्रयः । उपबाह्यकायां शतजित्, सहस्रजित्, अयुतजिदितित्रयो वैष्णवे ॥२॥ निम्लोचिः किङ्किणो धृष्टिरिति त्रय एकस्याम् । शताजिदादयस्त्रयोन्यस्यां भागवत ब्रह्माण्डयोः ॥३॥ निमिः कृमिलः वृष्णिः शूरः पुरञ्जयः रतिश्चैकास्यां भाग त लायोन्यस्यां भागवत ब्रह्मणाभ्यां मात्स्ये ॥४॥ बाह्यकायां निमिः कृपणः इति द्वौ कौर्म्मे । उपबाह्यकाया मयुतायुः, शतायुः, बलवान्, हर्षकृदिति चत्वारोलैङ्गे ॥५॥ पाद्मे तु भजमानस्य सृञ्जय्यां भाजोजज्ञे । भाजवंशधरा भाजका उच्यन्ते । भाजस्य द्वेभार्ये आस्ताम् । तयोरस्यनेमिः, कृकः, वृष्णिः, पुरञ्जयः, इत्यादयो भाजका अभूवन्नित्याह । नतः परंवंश्याः स्मर्यन्ते । पुराणेतिहासाख्याने तेषामनुपयोगात् ।

इति भाजक वराः प्रथमः ।

अथायं देवावृधो ब्रह्मण एकपञ्चाशो यदोस्तु त्रिचत्वारिंशः । सहि सर्वगुणोपेत पुत्र प्रेप्सया पर्णशाया नद्याः कूले तपश्चरन्नकस्मात् स्वयमुपस्थितां पर्णशां नाम कुमारीं भार्यार्थे परिजग्राह । तस्यामस्य बभ्रुः पुत्रोजज्ञे तस्य कीर्त्तिश्लोकौगीयेते—

यथैव शृणुमो दूरात्, संश्यामस्तथान्तिकात् ॥
बभ्रुः श्रेष्ठो मनुष्याणां, देवैर्देवावृधः समः ॥ १ ॥

पुरुषाः पञ्चषष्टिश्च, षट् सहस्राणि चाष्ट च ॥
येऽमृतत्व मनुप्राप्ता, बभ्रोर्देवावृधादिषे ॥ २ ॥

भागवत लङ्गादिष्वयं पाठः। हरिवंश ब्राह्मयोस्तु- षष्टिश्च षट् च पुरुषा सहस्राणि च सप्त चेति पठ्यते। पुरुषाः षट् च षष्टिश्च सहस्राणि तथाष्ट वे-इति वैष्णवे। षष्टिश्च पूर्वे पुरुषाः सहस्राणि च सप्ततिरिति मात्स्ये-पुरुषाः पञ्चषष्टिश्च सहस्राणि च सप्ततिरिति ब्रह्माण्डे। अस्य वभ्रोर्वंशधरा मार्तिकावताभोजाः प्रसिद्धयन्तीति हरिवंशे उक्तम्।

"पुत्रं सर्वगुणोपेतं, वभ्रुं देवावृधान्नृपात्।
तस्यान्ववायः सुमहान्, भोजाये मार्त्तिकावताः॥"

इति वचनात्। अन्ये तु महाभोजं पृथक् पठित्वा तद्वंशे मार्तिकावतान् भोजानाहुः मार्त्तिकावतको राजा साल्वो महाभारते प्रस्तूयते। अन्येवंशधराः स्पष्ट मनुक्रमेण नोल्लिख्यन्ते॥

इति भोजवंशे द्वितीयः।

अथ वृष्णिवंशः सहिवृष्णिर्ब्रह्मण एकस्यांशो यदोस्तु त्रिचत्वारिंशः वृष्णेरस्य द्वे भार्ये। तत्र गान्धर्यां सुमित्रः। माद्र्यांयुधाजिद्देवश्चेति द्वौ। सुमित्रस्य वंशो नास्ति। युधाजितो द्वौ पुत्रौ-अनमित्रः शिनिश्चेति। शिनेर्वंशो नास्ति। अनमित्रस्य त्रयः पुत्राः। निघ्नः शिनिर्वृष्णिः। तेनैतस्रस्तिस्रो वंशधाराः प्रवर्तन्ते-नैघ्नी शैनेयी वार्ष्णी चेति। तत्रादौ नैघ्नपीठिका यथा—

१ वृष्णिः	४३।१	५ सत्राजित्	५५।४७।५
२ युधाजित्	५२।४४।२	६ अङ्गारः	५६।४८।६
३ अनमित्रः	५३।४५।३	७ शत्रुघ्नश्चेति	५७।४९।७
४ निघ्नः	५४।४६।४		

अत्र हरिवंश ब्राह्मपाद्मेषु क्रोष्टोः सुमित्र युधाजिदादयोऽनुक्रम्यन्ते तच्चेन्त्यम्। तथात्वे श्रीकृष्णस्य यदुतः षष्ठत्वापौ शशबिन्दुजनकेन विचित्र रथेन समकालिकत्वे प्राप्ते मान्धात्रपेक्षयापि प्राक्तनत्वापत्तेः। मान्धातुः शशबिन्दु जामातृत्वात्। तथा च रामचन्द्रादपि श्रीकृष्णस्य पौर्वकालिकत्वं प्रसज्येत। नच्चैतिहासिकसमयविरुद्धम्। हरिवंश ब्राह्मयोस्तु वृष्णे-

वृषेर्वृष्टेः क्रोष्टोरित्येवं क्रमेण लिपिकरदोषाद् वृष्णिस्थाने क्रोष्टु शब्दस्य निपातः प्रतीयते। अथवा क्रोष्टुद्वयं कल्प्यम्। यदुपुत्रात् क्रोष्टोरन्यः। क्रोष्टा सात्वतपुत्राणामन्यतमः कश्चित् प्रतीयते। तस्य वृष्णिरिति प्रतिष्ठाशब्दः कुलोपाधिः। अत एव तद्वंशधाराणां सर्वेषां वृष्णिशब्देनाभ्युपपत्तिः। अपि च तद्वंशधरेषु यस्य प्रातिस्विकं नाम न ज्ञायते। तस्य वृष्णिरिति सामान्यशब्देनैवोल्लेखः क्रियते इत्यनुसन्धेयम्। अत्रेदं बोध्यम्। योऽयं सात्वतपुत्रो वृष्णिरित्युक्तः स यदोस्त्रिचत्वारिंशो भवति ततो नवमः कश्चिदन्योवृष्णिः क्रोष्टा प्रत्येतव्यः स यदोरेकपञ्चाशः स्यात् तस्यैते सुमित्रयुधाजिद्देवमीढास्त्रयः पुत्राः न तु त्रिचत्वारिंशत्तमस्य वृष्णेः। अन्यथा वृष्ण्यन्धकयोः सोदर भ्रातृत्वेन व्याख्यानात् तयोः पृथग् वंशद्वय प्रवृत्तौ वृष्णेः पञ्चमयोः श्रीकृष्ण सत्राजितोरन्धकाद् द्वादशेन कंसेन समकालिकत्वमाख्यायमानमनुपपन्नं स्यात् सप्तपुरुषान्तरितयोः समकालिकत्वासंभवात्।

युधाजिद्देवमीढयोर्द्वापञ्चाशत्तमत्वेऽभ्युपगम्यमाने तु पञ्च पञ्चा शत्तमस्य श्रीकृष्णस्य चतुः पञ्चाशत्तम कंसभागिनेयत्वमपि सुष्ठूपपद्यते। वंशग्रन्थेषु तु क्रोष्टुवृष्णिद्वयान्तरितानां पुरुषाणामुच्छेदोनाम सादृश्यनिबन्धनः संभाव्यते इति भाव्यम्। यत्तु हरिवंशे ब्राह्मे च सुमित्रस्थानेऽनमित्रः पठ्यते तदपि चिन्त्यम्। गान्धार्यामनमित्रस्यान्यैरस्मरणात्। अनमित्राच्छिनिर्जज्ञे कनिष्ठाद् वृष्णिनन्दनादित्येवं हरिवंशेऽनमित्रस्य वृष्णि पुत्रत्वमपि युधाजित्पुत्रत्वादेव। वृष्णिशब्दस्य वंशोपाधितया युधाजितोऽपि वृष्णि शब्दत्वात्। अन्यथा हरिवंशेऽनमित्रस्य क्रोष्टु पुत्रत्वेनोल्लेखाद् वृष्णि पुत्रत्वमुत्तरग्रन्थे स्मर्यमाणमनुक्तं स्यादिति बोध्यम्। अथ कौर्म्मे युधाजिन्न स्मर्यते। सा ग्रन्थ त्रुटिः। युधाजितो देवमीढुषः इति यशो नाम तच्चैतद्वंशधराणामुत्तरेषां कुलोपाधिनाम प्रख्यायते। अतएव अनमित्र निघ्नादयः सर्वेऽपि तेन शब्देन व्यपदिश्यन्ते देवमीढुषो देवमीढो देवमीढ्वानित्यर्थ शेषः। अथ निघ्नस्थाने निघ्नो भागवते। निघ्नस्य द्वौ पुत्रौ-प्रसेनः, शक्तिसेनश्च। तत्र प्रसेन एव प्रसेनजित्। शक्तिसेनस्य तु सत्राजिदिति नामान्तरेण सुप्रसिद्धः। सत्राजितः कर्केयीषु दशसु भार्यासु बहवः पुत्राः बभूवुः। तेषु वीरवत्यां भङ्गकरो, वातमतिः सुमेध, इति त्रयः सुप्रसिद्धाः। व्रतवत्यां पत्न्यां सत्यभामा, व्रतिनी, पद्मावती, चेति तिस्रः कन्या आसन्। ताः श्रीकृष्णस्य पत्न्यो बभूवुः। पद्मावत्याः स्थाने प्रस्वापिनी ब्राह्म हरिवंशयोः ब्रह्माण्डे तु भङ्गकारमातुर्वीरवत्या एव सत्यभामा व्रतिनी तपस्विनीत्येतास्तिस्रः कन्याः स्मर्यन्ते। पाद्मे तु सत्राजितः सत्या, व्रतवती स्वप्नेति तिस्रः

कन्या उच्यन्ते । अथ मात्स्ये सत्राजितो द्वारवत्यां पत्न्यां भङ्गकारः। भङ्गकारस्य पुनर्व्रतवत्यां पत्न्यां सत्यभामा व्रतिनी पद्मावतीत्येतास्तिस्रः कन्या बभूवुरित्याह। अपि च सत्राजितः पुत्रेषु वातमतिवसुमेधयोः स्थाने वातपति तपस्विनौ पठ्येते मात्स्ये । तपस्विनः स्थाने तपस्यावान् हरिवंशे । अत्र वातमतिर्वा वातपतिर्वा लेखदोषान्न निश्चीयते । वसुमेधतपस्विनौ नामभेदात् । पद्मावती, प्रस्वापिनी, स्वप्ना, तपस्विनी च नामभेदाः । अथ सत्यभामेयं सत्राजितः पुत्री, पौत्री, वेति विसंवादस्तु वंशविद्यानां भ्रान्ति निबन्धन एवेति दिक् । अथ हरिवंशे भङ्गकारस्य द्वौ पुत्रौ समक्षो नारेयश्चेति विशेषः ॥

अथ प्रसेन सत्राजितोः स्यमन्तकमणिसम्बन्धेन कथानकमाहुः—

सत्राजिद् द्वारवत्यां तु निवसन्नुपलब्धवान् ।
दिव्यं स्यमन्तकं नाम मणिरत्नं सरित्तटे ॥ १ ॥
ददौ भ्रात्रे प्रसेनाय सत्राजित्तं महामणिम् ॥
तेनैष शुशुभे नित्यं प्रसेनो विदितोऽभवत् ॥ २ ॥
स मणिः स्यन्दने रुक्मे वृष्ण्यन्धकनिवेशने ॥
कालवर्षी च पर्जन्यो न च व्याधिभयं क्वचित् ॥ ३ ॥
लिप्सां चक्रे प्रसेनात् तन्मणिरत्नं स्यमन्तकम् ॥
विष्वक्सेनो न तल्लेभे शक्तोऽपि न जहार सः ॥ ४ ॥
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः ॥
स्यमन्तककृते सिंहाद् वधं पाप सुदारुणम् ॥ ५ ॥
निजघान च तं सिंहमृक्षराजस्तु जाम्बवान् ॥
आदाय स मणिं दिव्यं स्वबिलं प्रविवेशह ॥ ६ ॥
सत्राजिता तु तद्भ्रात्रा यादवैश्च तथापरैः ॥
प्रसेनं निहतं श्रुत्वा गोविन्दः परिशङ्कितः ॥ ७ ॥
गोविन्देन हतो नूनं प्रसेनो मणिकारणात् ॥
इति प्रवादः सर्वत्र ख्यातः सत्राजिता कृतः ॥ ८ ॥
ततो वृष्ण्यन्धकाः कृष्णं प्रसेनवधकारणात् ॥
प्रार्थनां तन्मणेर्बुध्वा सर्वएव शशङ्किरे ॥ ९ ॥

स शङ्कमानो धर्मात्मा ह्यकारी तस्य कर्म्मणः ॥
आहरिष्ये मणिमिति प्रतिज्ञाय वनं ययौ ॥१०॥
मिथ्यापवादं तेभ्यस्तं निशम्य सहि केशवः ॥
अमृष्यमाणः सहसा तद्वनं विचचार ह ॥११॥
प्रसेनस्य पदंगृह्य सह पौरानवादिभिः ॥
ऋक्षवन्तं च दिव्यं च गिरिं गहन मायया ॥१२॥
अन्वेषयन् परिश्रान्तः स ददर्श महामनाः ॥
साश्वं हतं प्रसेनं तं नाविन्दत्तत्र तं मणिम् ॥१३॥
अथ सिंहः प्रसेनस्य शरीरस्या विदूरतः ॥
ऋक्षेण निहतो दृष्ट पदैर्ऋक्षस्य सूचितः ॥१४॥
पदैरन्वेषयामास गुहामृक्षस्य केशवः ॥
महत्यन्तर्विले वाणीं तत्र शुश्राव योषितः ॥१५॥
काचिद्धात्री शिशुं जाम्बवतः क्रीडयितुं तदा ॥
दर्शयन्ती मणिं तस्मै मुहुर्मुहुरुवाच ह ॥१६॥
सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ॥
सुकुमारक ! मारोदीस्तव ह्येष स्यमन्तकः ॥१७॥
शब्दं श्रुत्वा तु गोविन्दः खड्गपाणिः प्रविश्य सः ॥
अपश्यज्जाम्बवन्तं तमृक्षराजं महाबलम् ॥१८॥
युयुधे केशवस्तेन विले जाम्बवता सह ॥
बाहुभ्यामेव संक्रुद्धो दिवसानेकविंशतिम् ॥१९॥
प्रविष्टे तु विलं कृष्णे बलदेवपुरस्सराः ॥
पुनर्द्वारवतीमेत्य हतं कृष्णं न्यवेदयन् ॥२०॥
कृष्णस्य तेजसा ग्रस्तो जाम्बवान् प्रसभं मणिम् ॥
सुतां जाम्बवतीं चाशु विष्वक्सेनाय दत्तवान् ॥२१॥
स्यमन्तकं मणिं तस्माज्जग्राहात्मविशुद्धये ॥
अनुनीयर्क्षराजं तं निर्ययौ स ततो विलात् ॥२२॥

तेन मिथ्याप्रवादेन संतप्तः स जनार्दनः ॥
ददौ सत्राजिते रत्नमणिं सात्वतसन्निधौ ॥२३॥
ततस्ते यादवाः सर्वे वासुदेवं तमब्रुवन् ॥
अस्माकं मनसि ह्यासीत् प्रसेनस्तु त्वया हतः ॥२४॥
इत्थं महामणिं लब्ध्वा तस्मै सत्राजितेऽददत् ॥
तस्मान्मिथ्याभिशापात्तु व्यशुद्धत स केशवः ॥२५॥
अथ वीरवती नाम भंगकार प्रसूः पुनः ॥
सुषुवे सत्यभामां च व्रतिनीं च तथैव नीम् ॥२६॥
तिस्रश्चैताः कुमारीस्तु कृष्णाय प्रददौ पिता ॥
सत्राजित् कृष्ण संप्रीत्यै मणिं लब्ध्वा महामतिः ॥२७॥
ततः सत्राजितः कृष्णो मणिरत्नं स्यमन्तकम् ॥
ना दत्त तदुपश्रुत्य भोजेन शतधन्वना ॥२८॥
सदा हि प्रार्थयामास सत्यभामामजिन्दितम् ॥
अक्रूराऽन्तरमन्विष्यन्मणिरत्नं स्यमन्तकम् ॥२९॥
यत्तु सत्राजिते कृष्णो मणिरत्नं स्यमन्तकम् ॥२९॥
ददावहारय द्वत्रुर्भोजेन शतधन्वना ॥३०॥
सत्राजितं ततो हत्वा शतधन्वा महाबलः ॥
रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ॥३१॥
अक्रूरो रत्नमादाय शतधन्वानमर्हयन् ॥
समयं कारयांचक्रे नावेद्योऽहं त्वया क्वचित् ॥३२॥
वयमभ्युपपत्स्यामः कृष्णेन त्वां प्रधर्षितम् ॥
समाद्य द्वारका सर्वा वशे तिष्ठत्यसंशयम् ॥३३॥
हते पितरि दुःखार्ता सत्यभामा मनस्विनी ॥
प्रययौ रथमारुह्य नगरं वारणावतम् ॥३४॥
स सत्यभामा तद्वृत्तं भोजस्य शतधन्वनः ॥
भर्तुर्निवेद्य दुःखार्ता पार्श्वस्था श्रावयन्नवर्तयत् ॥३५॥

पाण्डवानां च दग्धानां कृष्णः कृतोदकक्रियाम् ॥
कुल्यार्थे चाथ पाण्डूनां न्ययोजयत सात्यकिम् ॥३६॥
स्वयं सत्वरमागत्य द्वारकां मधुसूदनः ॥
पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ॥३७॥
हतः प्रसेनः सिंहेन सत्राजिच्छत धन्वना ॥
स्यमन्तकस्तु मद्गामी तस्य प्रभुरहं मतः ॥३८॥
तदारोह रथं शीघ्रं भोजं हत्वा महारथम् ॥
स्यमन्तको महाबाहो अस्माकं स भविष्यति ॥३९॥
ततः प्रववृते युद्धं तुमुलं भोजकृष्णयोः ॥
शतधन्वा ततोऽक्रूरं सर्वतो दिशमैक्षत ॥४०॥
सरब्धौ तावुभौ तत्र दृष्ट्वा भोजजनार्दनौ ॥
शक्तोऽपि शापाद्धार्दिक्यमक्रूरो नान्वपद्यत ॥४१॥
अपयाते ततो बुद्धिं चक्रे भोजो भयार्दितः ॥
योजनानां शतं साग्रं हृदया प्रत्यपद्यत ॥४२॥
विख्याता हृदया नाम शतयोजन गामिनी ॥
भोजस्य वडवा तस्य यया कृष्ण मयोधयत् ॥४३॥
क्षीणां जवेन हृदयामध्वनः शतयोजने ॥
दृष्ट्वा रथस्य तां वृद्धिं शतधन्वा तदाद्रवत् ॥४४॥
ततस्तस्या हयायास्तु श्रमात् खेदाच्च तत्क्षणे ॥
खमुत्पेतुर्द्रुतं प्राणाः कृष्णो रामं ततोऽब्रवीत् ॥४५॥
तिष्ठ तावदिहैव त्वं दृष्टदोषा हया मया ॥
पद्भ्यांगत्वा हरिष्यामि मणिरत्नं स्यमन्तकम् ॥४६॥
पद्भ्यामेव ततो गत्वा शतधन्वानमच्युतः ॥
मिथिलो पवन भोजं जघान परमास्त्रवित् ॥४७॥
स्यमन्तकं तु ना पश्यद्धत्वा भोजं महाबलम् ॥
निवृत्तं चाब्रवीत् कृष्णं मणिं देहीति लाङ्गली ॥४८॥

नास्तीति कृष्णः प्रोवाच ततो रामो रुषान्वितः ॥
धिक् शब्दपूर्वमसकृत् प्रत्युवाच जनार्दनम् ॥४९॥
भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहम् ॥
कृत्यं न मे द्वारकया न त्वया न च वृष्णिभिः ॥५०॥
प्रविवेश ततो रामो मिथिलां हृष्टमानसः ॥
सर्वकामैरुपहृतैर्मिथिलेनाभि पूजितः ॥५१॥
एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः ॥
नानारूपान् क्रतून् सर्वानाजहार निरर्गलान् ॥५२॥
दीक्षामयं सकवच रक्षार्थं प्रविवेश ह ॥
स्यमन्तककृते प्राज्ञो गान्दी पुत्रो महायशाः ॥५३॥
अथ रत्नानि चाजस्रानि धनानि विविधानि च ॥
पञ्चि वर्षाणि धर्मात्मा यज्ञेष्वेव न्ययोजयत् ॥५४॥
अक्रूरयज्ञा इति ते ख्यातास्तस्य महात्मनः ॥
बहुन्नदक्षिणाः सर्वे सर्वकाम प्रदायिनः ॥५५॥ (ब्रह्म.१५अ.)
अथ दुर्योधनो राजा गत्वा स मिथिलां तदा ॥
गदाशिक्षां तदा दिव्यां बलदेवाद् प्रसान् ॥५६॥
संप्रसाद्य ततो रामो वृष्ण्यन्धक महारथैः ॥
आनीतो द्वारकामेव कृष्णेन च महात्मना ॥५७॥
अक्रूरश्चान्धकैः सार्धमायातो मिथिलां प्रति ॥
हत्वा सत्राजितं सुप्तं सहबन्धुं महाबलः ॥५८॥
ज्ञातिभेदभयाद् कृष्णस्तुमुपेक्षितवांस्तदा ॥
अपयाते तदाक्रूरेऽनावृष्टि द्वारकापुरे ॥५९॥
अवृष्ट्या द्वारका राज्यमभवद्बहुधा कृशम् ॥
ततः प्रसादयामासुरक्रूरं कुकुरान्धकाः ॥६०॥
पुनर्द्वारवतीं प्राप्ते तस्मिन् दानपतौ ततः ॥
प्रववर्ष स पर्जन्यः कक्षे जलनिधेस्तदा ॥६१॥

प्रीत्यर्थं प्रददौ धीमानक्रूरः शीलसंमताम् ।
स्वसारं वासुदेवाय श्रीकृष्णाय महौजसे ॥६२॥
अथ विज्ञाय योगेन कृष्णो बभ्रुगतं मणिम् ।
सभामध्यगतः प्राह तमक्रूरं जनार्दनः ॥६३॥
यत्तत्स्यमन्तकं रत्नं तव हस्तगतं विभो ।
तत्प्रयच्छतु मानार्हं मयि मानार्थकं कृथाः ॥६४॥
पाण्डुपुत्रगते काले यो रामोऽभूत्प्रमानघ ।
प्रसङ्गोऽसकृत प्राप्तस्ततः कालात्ययोः महान् ॥६५॥
स ततः कृष्णवचनात् सर्वसात्वत संसदि ।
प्रददौ तं मणिं बभ्रुरक्लेशेन महामतिः ॥६६॥
तदस्तमार्जवात् प्राप्तं बभ्रोर्हस्ता ज्जनार्दनः ॥
ददौ हृष्टमनाः कृष्णस्तं मणिं बभ्रवे पुनः ॥६७॥
स कृष्णहस्तात् संप्राप्य मणिरत्नं समन्तकम् ॥
आबध्य गोनिभौ पुत्रौ विरराज शुभानिव ॥६८॥

अथ वृष्णिवंशे शैनेया यथा—४९

५१	४३	१ वृष्णिश्चित्रत्वारिंशः	५४	४६	४ शिनिः	५७	४९	७ असङ्गः
५२	४४	२ युधाजित	५५	४७	५ सत्यकः	५८	५०	८ कुणिः
५३	४५	३ अनमित्रः	५६	४८	६ युयुधानः	५९	५१	९ युगन्धरश्चेति

अथायं शिनिर्द्विविधः पठ्यते । युधाजितः पुत्रोऽनमित्र भ्रात्येकः । अनमित्रपुत्रो निघ्न भ्रातेत्यन्यः । पाद्मलैङ्गमात्स्य ब्रह्माण्डादिषु पृथगुभयोः स्मरणात् । भागवतेऽपि "वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप ! शिनिस्तस्याथ सत्यकः—इत्येवं शिनेर्द्वित्वं स्पष्टमुल्लिख्यते । कौर्म्मेऽप्येवं शिनिद्वयं स्मर्यते । यच्चनमित्र भ्रातुः शिनेः स्थाने निमिरिति कौर्म्मे पठ्यते स लेखप्रमादः । अथ स निमिरेवास्तु । शिनिद्वयस्वीकारापेक्षया प्रथमस्य निमिशब्देन व्यपदेशौचित्यात् । शिनेर्वंशधरा शैनेयाः शैन्याश्चोच्यन्ते । युयुधानोऽयं सात्यकिः श्रीकृष्णस्या-

ज्ञानुरालः सहचरः। युयुधानस्य भूतिजय सञ्जयासङ्गप्रभृतयो बहवः पुत्रा आसन्। तत्र भूतेर्युगन्धरो भौम्य इति ब्रह्माण्डे। भूतिरियं भूमिर्हरिवंशे पठ्यते। अथ जयात् कुणिरततो भागवते। संजयात् कुणिस्ततो युगन्धरो युगन्धरो वैष्णवे। असङ्गात्कुणिस्ततो युगन्धरो लैङ्गकौर्म्मयोः। कुणिस्थाने द्युम्निर्मात्स्ये। भूतिजयसंजयासङ्गा एकस्यैव नामान्तराणीत्येके। कुणिर्वा द्युम्निर्वा ब्रह्माण्डे न स्मर्यते॥

अथानमित्रस्य तृतीयः पुत्रो वृष्णिर्नाम। सत्वत पुत्राद्वृष्णेरयमन्यो वृष्णिः। परे त्वाहुः—युधाजित् पुत्रोऽयं वृष्णिर्नानमित्रस्य। तत्रापि नायं शिनिरन्यो वृष्णिरन्यः किन्तु अनमित्र भ्रातुः शिनेरेवेदं वृष्णिरिति नामान्तरम्। युधाजितः पुत्रसंख्याने लैङ्गब्रह्माण्डादिषु "अनमित्रं शिनिं चैव तावुभौ पुरुषोत्तमौ"—इति द्वयोरेवोल्लेखं कृत्वा अनमित्रवंशधरानुल्लिख्य शिनेर्वंशधरोल्लेखप्रसङ्गे—"माद्र्याः सुतस्य जज्ञे तु सत्वृष्णिर्युधाजितः। जज्ञाते तनयौ वृष्णेश्चफल्कश्चित्रकश्च यः"—इति युधाजित्पुत्रत्वेन वृष्णेरुल्लेखात्। तस्माद् युधाजितो द्वावेव पुत्रौ न त्रय इति। अन्ये त्वाहुः—"अनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः। श्वफल्कश्चित्ररथश्चेति" भागवतोक्तेरनमित्रपुत्रो वृष्णिर्न त्वनमित्रभ्राता वृष्णिरिति॥ वस्तुतस्तु—"अनमित्रस्यान्वये वृष्णिः, तस्मात् श्वफल्कः"—इति वैष्णवोक्तेर्युधाजित्पुत्रोवाऽनमित्रपुत्रो वा ततोऽप्युत्तरस्यानमित्र वंशधरस्य कस्यचिद्वापुत्रो वृष्णिरासीत्। वृष्णिरिति सात्वतपुत्राणामेकस्य यादृच्छिकी संज्ञा। तस्य च वंशकरत्वात् तद्वंशधरेषु सर्वेष्वेवायं वृष्णिशब्दो निर्विशेषं प्रवर्तते। युधाजिद्वृष्णिः निघ्नो वृष्णिः तदुत्तरेऽपि सर्वे वृष्णयः। तेन यस्य कस्यापि निरूढं यादृच्छिकं नाम न ज्ञायते स वृष्णिशब्देनैवोल्लिख्यते। प्रतिष्ठार्थं वा वृष्णिशब्दोल्लेखः। प्रतिष्ठितानां स्वनामानुल्लिख्य कुलोपाधिनाम्ना यशोनाम्ना वा व्यपदेशस्य लोकमर्यादासिद्धत्वात्। तेन युधाजिद्वंशधरस्य कस्यचित् प्रतिष्ठितस्यायं वृष्णिशब्देन व्यपदेशो द्रष्टव्यः। तत्रान्येषामप्रसिद्धेरनमित्रस्यैवायं कश्चिदज्ञातनामा तृतीयः पुत्रो वृष्णिर्नामेति सुष्ठुप्रतीमः। तस्य च बभ्रुरिति यादृच्छिकं नाम संभाव्यते। तद्वंशधरस्याक्रूरस्य बहुधा बभ्रुशब्देन व्यपदेशदर्शनात्। अक्रूरस्यैव बभ्रुरिति संज्ञान्तरकल्पनापेक्षया कुलोपाधिसंज्ञाकल्पनस्य युक्तत्वात्। तस्यैतस्य वृष्णेर्वंशक्रमे द्वे शाखे भवतः श्वफल्कशाखा, चित्रकशाखा च। आद्या यथा—

५१	४३	१	वृष्णिस्त्रिचत्वारिंशः	५५	४७	५	वृषभः
५२	४४	२	युधाजित	५६	४८	६	जयन्तः
५३	४५	३	अनमित्रः	५७	४९	७	सदायज्ञः
५४	४६	४	वृष्णिः	५८	५०	८	अक्रूरः
				५९	५१	९	देवः

अत्रायमनमित्रपुत्रो वृष्णिर्मात्स्ये न स्मर्यते तत्र युधाजितोऽनमित्रस्यैव वृषभः क्षत्रश्वेति द्वौ पुत्रौ निर्दिश्य वृषभादिक्रमोल्लेखात्। पाद्मे त्वनमित्रोऽपि न स्मर्यते। युधाजित एव ऋषभश्चित्रश्वेति द्वौ पुत्रौ निर्दिश्य ऋषभादिक्रमोल्लेखात्। तदित्थं पाद्मे ऋषभचित्रयोः स्थाने ऋषभचित्रौ पठ्येते। मात्स्यपाद्माभ्यामितरेषु तु वंशग्रन्थेषु सर्वत्र तयोः स्थाने श्वफल्कचित्रकौ स्मर्येते। भागवते तु चित्रकस्थाने चित्ररथः। अथ हरिवंशे वृष्णेस्त्रिचत्वारिंशस्य गान्धार्यामनमित्रः पुत्रोऽभूत्। माद्र्यां युधाजित्। तयोर्युधाजितः पृश्निरभूत् पृश्नेः श्वफल्कश्चित्रकश्चेति द्वौ पुत्रावित्याह। एतौ च श्वफल्क चित्रकौ वृष्णेः पुत्रौ, वृष्णिस्तु अनमित्रस्यान्वयेऽभूदिति वैष्णवे। स वृष्णिरनमित्रस्य पुत्र इति भागवते। स वृष्णिर्युधाजितः पुत्र इति लैङ्गे। तेनात्रानमित्रो मध्ये न स्मर्यते। एवं स वृष्णिर्माद्र्यां जात इति ब्रुवतः कौर्म्मस्य मते वृष्णेरस्य युधाजित्भ्रातृतया ततः श्वफल्क चित्रकयोर्जननस्मरणादनमित्रवद् युधाजिदपि न स्मर्यते। अपि च वृषभस्य काशिराजसुतायां जयन्तः। जयन्तस्य जयन्त्यां सदायज्ञः तस्मादक्रूरः इति मात्स्ये। सदायज्ञस्थाने सदायज्वेति विशेषः पाद्मे। अन्यत्र तु सर्वत्र वृष्णेः श्वफल्कः। तस्य काशिराजसुतायां गान्दिन्यामक्रूर इति स्मर्यते। तन्मतेषु मत्स्यपाद्माभ्यामितरेषु वंशग्रन्थेषु जयन्तसदायज्ञौ न स्मर्येते। तन्मते श्वफल्कः सप्तचत्वारिंशः। अक्रूरस्त्वष्टाचत्वारिंशः। अक्रूरस्य बभ्रुरिति नामान्तरम्।

अथैतस्य श्वफल्कस्याक्रूरादन्येऽपि पुत्रा बभूवुः। तेषां संख्या च संज्ञा च ग्रन्थभेदाद् भिद्यते तद्यथा—

हरिवंशे		ब्राह्मे		पाद्मे	वैष्णवे	भागवते	लैङ्गे	कौर्म्मे	मात्स्ये	ब्रह्माण्डे
३३		१४		११	१२	११	१४	२	११	१३
मद्गुः	१	मद्गुः	१	सदालम्भः	मद्गुः	.....	मन्युः	मंगुः	सदालम्भः	मद्गुः
उपसङ्गः	२	उपमद्गुः	२	उपलम्भः	उपमद्गुः	आसङ्गः	उपमन्युः	उपमद्गुः	उपलम्भः	उपमद्गुः
मृदुरः	३	मेदुरः	३	सुधरिः	मृदुरः	मृदुरः	मृदुः		वृकलः	मृदुरः
अरिमेजयः	४	अरिमेजयः	४	अरिमेजयः	अरिमेजयः	सारभेयः	जनमेजय		अरिमेजयः	अरिमेजयः
अविक्षिपः	५	अविक्षितः	५	उत्कलः	उपक्षत्रः	मृदुविद्गिरिः	गिरिक्षः		मिरिः	गिरिरक्षः
उपेक्षः	६	आक्षेपः	६	सदायशाः	गिरिक्षत्रः	क्षत्रोपेक्षः	उपेक्षः		सदापक्षः	यक्षः
शत्रुघ्नः	७	शत्रुघ्नः	७	शत्रुघ्नः	शतघ्नः	शत्रुघ्नः	शत्रुघ्न		शत्रुघ्नः	शत्रुघ्नः
अरिमर्दनः	८	अरिमर्दनः	८	आर्यशैशवः	अरिमर्दनः	अरिमर्दनः	अरिमर्दनः		वीर्यः	अरिमर्दनः
धर्मधृक्	९	धर्मधृक	९	धर्मदृष्टिः	धर्मधृक	धर्मवृद्धः	धर्मभृत		धर्मभृत	धर्मवृद्धः
यतिधर्मा	१०	यतिधर्मा	१०	सृष्टिमौलिः	मृदुविश्वः	सुकर्मा	धृष्टधर्मः		धर्मवर्मा	सुकर्मा
गृध्रभोजः	११	धर्मेक्षः	११	धर्मः	.....	.....	वरः		सर्वोतरः	.....
अन्तकः	१२	अन्धकरः	१२	.....	गन्धमादः	गन्धमादः	गौधनः	.....	धृष्टमानः	गन्धमादः
अवाहः	१३	आवाहः	१३	.....	.....	.....	आवाहः	.....	.....	आवाहः
प्रतिवाहः	१४	प्रतिवाहः	१४	.....	प्रतिवाहः	प्रतिवाहुः	प्रतिवाहः	.....	.....	प्रतिवाहः
सुन्दरी कन्या		वसुन्धरा सुचीरवाः कन्या				सुतारा कन्या		सुधार कन्या		वसुदेवा कन्या

हरिवंशे तावदेषां द्विः प्रसङ्गो दृश्यते । तयोश्च प्रथमाद् द्वितीये विशेषो यथा अविक्षिप-मद्गुधर्मदृगन्तकावाहप्रतिवाहानां स्थाने गिरिक्षिपमङ्गधर्मभृदन्धकसुबाहुप्रतिवाहवः पठ्यन्ते । सुन्दरी च वसुन्धरा नाम श्वफल्कस्य कन्या साम्बस्य महिष्यासीदित्याह । अत्रैतस्याः कन्यायाः वसुदेवा वसुन्धरा सुन्दरी सुधारा सुतारा सुचीरेतिलेखभेदान्नामभेदाः । ता एताः श्वफलकस्य सन्ततयोऽक्रूरस्य भ्रातर इति हरिवंश, ब्राह्म, वैष्णव, भागवत, कौर्मेषु प्रतिज्ञायते । श्वफल्क-पुत्रस्याक्रूरस्य शैव्यसुतायां रत्नायामिमे पुत्राः पुत्र्यश्चेति पाद्म, लैङ्ग, मात्स्य, ब्रह्माण्डेषु स्मर्यते । तत्र तत्त्वं चिन्त्यम् । अथाक्रूरस्योग्रसेनायां सुगात्र्यां द्वितीयस्यां पत्न्यां देववान् उपदेव इति द्वौ पुत्रौ । उग्रसेना, औग्रसेनीत्यनर्थान्तरम् । शूरसेनायामिति पाद्मे । हरिवंशे ब्राह्मे च देववतः स्थाने प्रसेनः पठ्यते । अक्रूरस्य काशिकन्यायां सत्यकेतुरिति पाद्मे ॥

अथान्या चित्रकशाखा तत्र सात्वतवृष्णिप्रपौत्रस्य युधाजित्पौत्रस्यानमित्रपुत्रस्य वृष्णेर्योऽन्यः पुत्रः स चत्र इति मात्स्ये । चित्रः पाद्मे चित्रको हरिवंशब्राह्मवैष्णवलैङ्ग-कौर्मब्रह्माण्डेषु । चित्ररथो भागवते । सोऽयंस्वफल्कस्य सोदरो भ्रातेत्याहुः । लैङ्गेतु सात्वत-वृष्णिपुत्रयोः सुमित्रयुधाजितोर्म्मध्ये युधाजितो वृष्णिः, ततः श्वफल्कः इत्येकः पुत्रः । सुमित्रस्य तु वार्ष्णेश्चित्रकः पुत्र इत्याह ॥ तस्यैतस्य चित्रकस्य अश्विन्यां पत्न्यां पृथुः विपृथुः, अश्वग्रीवः, अश्ववाहुः, सुपार्श्वकः, गवेषणः, अरिष्टनेमिः, अश्वः, सुधर्मा, धर्मभृत्, सुबाहुः, बहुबाहु, इति द्वादश पुत्राः श्वविष्टा, श्रमणा, चेति द्वे कन्ये इत्युक्तं हरिवंश ब्राह्मयोः ।

अथाश्वग्रीवस्थानेऽश्वत्थामा मात्स्ये । अश्ववाहुस्थाने सुबाहुर्लैङ्ग, कौर्म्म, मात्स्येषु । अश्ववाहो ब्रह्माण्डे । गवेषणस्थाने गवेक्षणः कौर्म्मे । अरिष्टनेमिस्थाने रिष्टनेमिः पाद्मे । वृष्टिनेमि मात्स्ये । अश्वो मात्स्ये नस्मर्य्यते । अश्वस्थानेऽश्वमुखो ब्रह्माण्डे । सुवर्चाः पाद्मे । सुधर्मस्थाने धर्मो लैङ्गे । सुवर्मा ब्रह्माण्डे । धर्मभृतः स्थाने मृदुः पाद्मे । शर्य्यातिर्मात्स्ये । वर्मभृत् ब्रह्माण्डे । सुबाहुस्थाने सुभूमिर्लैङ्गे । अभूमिः पाद्ममात्स्यब्रह्माण्डेषु बहुबाहुस्थाने बहुभूमिः पाद्मलैङ्गमात्स्यब्रह्माण्डेषु । अरिष्टनेम्यादयः षडुत्तराः कौर्म्मे न स्मर्य्यन्ते ॥

इति सात्वतेषु चतुर्थो वृष्णिवंशो व्याख्यातः ।

४

अथ सात्वतस्य योऽन्यः पुत्रोऽन्धको नाम स ब्रह्मण एकपञ्चाशो यदोस्तु त्रिचत्वा-रिंशः ॥ तस्य कुकुरः भजमानः, शुचिः, कम्बलवर्हिषः, इति चत्वारः पुत्राः । ते च शरकान्त-सुतायां जज्ञिरे इति केचित् । काश्यस्य दृढाश्वस्य कन्यायामित्यन्ये । शुचिस्थाने शमिर्हरि-

वंशादौ पठ्यते। एतेषु शुचेः कम्बलबर्हिषश्च वंशेनाख्यायते। कुकुरवंशधरास्तु कुकुरान्धका उच्यन्ते। यथाः—

५१	४३	१ अन्धकः		४७	५ कपोतरोमा	५९	९ पुनर्वसुः
५२	४४	२ कुकुरः	५४	४८	६ विलोमत्तित्तिरिः	६०	१० आहुकः
५३	४५	३ वृष्णिः	५५	४९	७ अनुः	६१	११ उग्रसेनः
५४	४६	४ धृष्णिशूरः	५६	५०	८ अभिजित्	६२	१२ कंसश्चेति

अत्र कुकुरस्य वृष्णेः स्थाने वृष्टिर्ब्राह्मपाद्मयोः। धृष्टो वैष्णवे, धृष्णुर्हरिवंशे। वह्निर्भागवते। धृतिशूरस्थाने धृतिः पाद्ममात्स्ययोः। शूरो लैङ्गे। ब्राह्म,वैष्णवभागवत-कौर्म ब्रह्माण्डेषु तु नायं धृतिशूरः स्मर्यते। अथ विलोमत्तित्तिरिस्थाने तित्तिरिर्ब्राह्मपाद्मयोः। तैत्तिरिर्मात्स्यहरिवंशयोः। विलोमा वैष्णवकौर्म्मब्रह्माण्डेषु। विलोमको भागवतलैङ्गयोः। कपोत-रोमा विलोमकश्च वैपरीत्येन पठ्यते भागवते। वह्नेर्विलोमकस्ततः कपोतरोमा, ततोऽनुरीति॥

अथानुरयं नरि पाद्मे। नलो लैङ्गे। तमः कौर्म्मे। सर्पो नलो मात्स्ये। अन्धको ब्रह्माण्डे स्मर्यते तस्य नामान्यच्चन्दनोदकदुन्दुभिरिति पाद्मे। चन्दनदुन्दुभिरिति केचित्। चन्दनानकदुन्दुभिर्लैङ्गे। आनकदुन्दुभिर्वैष्णवकौर्मयोः। नन्दनोदरदुन्दुभिरिति केचित्। अनोः आनकदुन्दुभिरिति तु वैष्णवेऽयंपाठः। तमस्यानकदुन्दुभिरिति कौर्म्मेऽप्यपपाठः। चन्दनोदक दुन्दुभेरभिजिदिति कौर्म्मोक्त्यानकदुन्दुभेरेव चन्दनोदकदुन्दुभितया तमसस्तस्यानोरेव तन्नाम्ना व्यवहारस्य पाद्मब्रह्माण्डयोः स्पष्टमाख्यानात्। तस्मादनुरानकदुन्दुभिस्तत आनकदुन्दुभि रित्येवं पाठो द्रष्टव्यः। केचित्तु नलस्थानेद्वौपुत्रौ-आनको दुन्दुभिश्चेति दुन्दुभेर्द्वौ पुत्रौ दारेद्योतः पुनर्वसुश्चेत्याहुः ब्राह्म हरिवंशयोस्त्वयमनुर्न स्मर्यते अस्यानोस्तुम्बुरुर्नाम गन्धर्व सखाऽऽसीत्। तुम्बुरुसंसर्गप्रभावेणायमनुः- -संगीतविद्यायामतिकुशलो बभूव। तस्य गोवर्द्धनपर्वते स्वयमुपलब्ध कन्यायां सुभुजो नाम पुत्रो ह्रीमती नाम कन्या च जज्ञाते। तौ च भ्रातरौ मातापितृभ्यां सुशिक्षितो संगीतविद्यायामतिकुशलौ बभूवतुः। तत्र सुभुजो गन्धर्व-कन्यां मानसीमुपयेमे। -"मानस्याः सुभुजो लेभे पञ्चपुत्राननुत्तमान्। वीणा वादन तत्वज्ञान् गानशास्त्रविशारदान् ॥१॥ पुत्रैः पौत्रैः सपत्नीको राजा ज्ञानविशारदः

पूजयामास गानेन देवं त्रिपुरनाशनम् ॥२॥ ह्रीमतीं च तां सुवाहुर्नाम गन्धर्वो लब्ध्वा तस्यां सुषेणं, धीरं, सुग्रीवं, सुभोजं, नरवाहनमिति पञ्चपुत्रान् प्राप ॥

अभिजित्स्थानेऽभिजातो मात्स्ये । दरिद्योतो भागवते । अभिजित्पुनर्वसुश्च वैपरीत्येन पठ्यते हरिवंश ब्राह्मयोः । तित्तिरेः पुनर्वसुः । ततोऽभिजित् । तत आहुक इति ॥"कपोतरोमा तस्थाथ, तैत्तिरिस्तनयोऽभवत् । जज्ञे पुनर्वसुस्तस्मादभिजित्तु पुनर्वसोः ॥१ तस्य वै पुत्रमिथुनं बभूवाभिजितः किल । आहुकश्चाहुकी चेति ख्यातौ ख्यातिमतां वरौ ॥"–इति हरिवंशोक्ते ॥ अन्ये तु पुनर्वसोराहुकः पुत्र, आहुकी कन्या चेत्याहुः ॥

अथाहुकस्य गाथां गायन्ति—

श्वेतेन परिवारेण किशोरप्रतिमो महान्
अशीतिवर्मणा युक्त आहुकः प्रथमं व्रजेत् ।१॥
पूर्वस्यां दिशि नागानां भोजस्य प्रययुः किल ।
रौप्यकाञ्चन कक्षाणां सहस्राण्येक विंशतिः ॥२॥
सोपासङ्गानुकर्षाणां ध्वजिनां सवरूथिनाम् ।
रथानां मेघघोषाणां सहस्राणि दशैव तु ॥३॥
तावन्त्येव सहस्राणि उत्तरस्यां तथा दिशि ।
आभूमिपाला भोजास्तु सन्ति ज्याकिङ्किणीकिनः ।४॥
नापुत्रवान्नाशतदो नासहस्र शतायुषः ।
नाशुद्धकर्मा नायज्वा यो भोजमभितो व्रजेत् ॥५॥
नासत्यवादी नातेजा नाविद्वान् नासहस्रदः ।
नाशुचिर्नाऽप्यधर्मात्मा यो भोजेष्वभ्यजायत ॥६॥
आहुकस्य भूतिं प्राप्ता इत्येवमनुशुश्रुम ।
आहुकीं चाप्यवन्तिभ्यः स्वसारं दधुरन्धकाः ॥७॥

अस्याहुकस्य काश्यायां देवक उग्रसेन इति द्वौ पुत्रौ । तत्र देवकस्य चत्वारः पुत्राः सप्तकन्याश्चाभूवन् । पुत्रा यथा-देववान्, उपदेवः, सुदेवः, देवरक्षितः, इति ॥ अक्रूरपुत्राभ्यामन्यावेतौ देववदुपदेवौ । अथ सुदेव स्थाने सहदेवो वैष्णवे । देवरक्षितस्थाने देववर्द्धनो भागवते ॥ कन्या यथा वृकदेवा, उपदेवा, सुदेवा, देवरक्षिता, शान्तिदेवा, सहदेवा, देवकी,

चेति। वृकदेवास्थाने वृकदेवी ब्राह्महरिवंशयोः। धृतदेवा भागवतकौर्म, ब्रह्माण्डेषु। वृषदेवा लैङ्गे। श्रुतिश्रवापाद्मे। मित्रदेवी मात्स्ये॥ उपदेवास्थाने उपदेवी ब्राह्महरिवंशयोः। सत्यदेवी मात्स्ये। शिशिरावती ब्रह्माण्डे। सुदेवास्थाने श्रीदेवा पाद्म, वैष्णव, भागवत, लैङ्ग, कौर्म, ब्रह्माण्डेषु। श्रीदेवी मात्स्ये। देवरक्षिता स्थाने यशोदा पाद्मे। यशोधरा मात्स्ये। शान्तिदेवास्थाने श्रुतदेवा पाद्मे। श्रुतदेवी मात्स्ये। सहदेवास्थाने सुनाम्नी ब्राह्मे सुरूपा पाद्मे। सुतापी मात्स्ये। सप्तार्प्यता वसुदेवस्थानकदुन्दुभेः पत्न्यो बभूवुः॥ उक्तोदेवकसन्तानः उग्रसेनस्य तु भोजराजस्य नव पत्राः पञ्चकन्याश्चासन्। चतुर्दशानां नाम भेदा यथा।

	ब्राह्मे	पाद्मे	वैष्णवकौर्मब्रह्माण्डेषु	भागवते	मात्स्ये
१	कंसः	,,	,,	,,	,,
२	न्यग्रोधः	,,	,,	,,	,,
३	सुनामा	,,	,,	,,	,,
४	कङ्कः	,,	,,	,,	,,
५	सुभूषणः	सुभूः	सुभूमिः	सुहूः	अजभूः
६	राष्ट्रपालः	,,	,,	,,	,,
७	सुतनुः	शङ्कुः	शङ्कुः	शङ्कुः	शङ्कुः
८	अनावृष्टिः	बद्धमुष्टिः	युद्धतुष्टिः	सृष्टिः	युद्धमृष्टिः
९	पुष्टिमान्	सुमुष्टिः	तुष्टिमान्	तुष्टिमान्	सुमुष्टिदः
१०	कंसा	,,	,,	,,	,,
११	कंसवती	,,	,,	,,	,,
१२	सुतनुः	सुरभी	,,	शूरभू	सुतन्तः
१३	राष्ट्रपाली	,,	,,	,,	,,
१४	कङ्का	,,	,,	,,	,,

१ कंसः	६ सुतनुः	१० कंसा
२ न्यग्रोधः	७ सुभूषणः	११ कंसवती
३ सुनामा	८ अनावृष्टिः	१२ सुतनूः
४ कङ्क	९ पुष्टिमांश्चेति	१६ कङ्का
५ राष्ट्रपालः	१० ×	१४ राष्ट्रपाली

अत्र सुतन्वादिपुत्राणां चतुर्णां स्थाने शङ्कुः सुभूः बद्धमुष्टिः सुमुष्टिरिति आद्ये। शङ्कुः सुहूः सृष्टिस्तुष्टिमान्—इति भागवते। शङ्कुः, अजभूः, युद्धमुष्टिः सुमुष्टिदः, इति मात्स्ये। शङ्कुः, सुभूमिः युद्धमुष्टिस्तुष्टिमानिति वैष्णवकौर्म्म-ब्रह्माण्डेषु। कन्यासुतुसुतनूस्थाने सुरभी पाद्मे। शूरभू भागवते। सुतन्तुर्मात्स्ये। पञ्चैता उग्रसेनकन्या वसुदेवानुजानां देवभागादीनां पत्न्योऽभूवन्नित्याहुः॥ सर्वेऽप्येते भोजा उच्यन्ते। उग्रसेनकंसयोर्बहुधा भोजशब्देन व्यपदिश्यमानत्वात्। द्वावुग्रसेनौ मसकालिकावास्ताम् वैदर्भी माथुरश्च। तत्रायमुग्रसेनो माथुरो राजा। तस्य भार्या तु पद्मावती वैदर्भस्योग्रसेनस्य कन्यासीत्। तस्यां गोभिलदैत्यवीर्येण कंसो जज्ञे—इति पाद्मे भूमिखण्डेऽष्टचत्वारिंशऽध्याये उक्तम्। इत्थमयं कुकुरान्धकवंशो व्याख्यातः। अथान्धकस्य द्वितीयः पुत्रो भजमानः। तस्य वंशे वंशवैद्यानां मतभेदा भवन्ति तत्र।

५१। ४३। १ अन्धकः ···		५६। ४८। ६ प्रतिक्षत्रः		६०। २५	१० कम्बल बर्हिषः
५२। ४४। २ भजमानः ···		५७। ४९। ७ स्वयं भोजः		६१। ५३	११ असमंजाः
५३। ४५। ३ विदूरथः ···		५८। ५०। ८ हृदीकः		६२। ५४	१२ तमोजाः
५४। ४६। ४ शूरोराजाधिदेवः		५९। ५१। ९ देववाहुः		६३। ५५	सुदंष्ट्रः
५५। ४७। ५ शमी ···					

इत्येष क्रमोमुख्यः। विदूरस्थस्य द्वौ पुत्रौ—शूरो राजाधिदेवश्च तत्र शूरस्य शमीति वैष्णवभागवतकौर्म्मब्रह्माण्डेषु स्मर्यते। तत्रापि भागवते शमिस्थाने भजमानः। प्रतिक्षत्रस्थाने शिनिरिति विशेषः। ब्रह्माण्डे पुनरष्टौ पुत्राः शूरस्योच्यन्ते। शमी, वातः, निवातः, शोणितः, श्वेतवाहनः, गदवर्म्मा, निदान्तः शत्रुजित्—इति॥ अथ हरिवंशब्राह्मयोरस्य विदूरस्थस्यैक एव पुत्रो राजाधिदेवो नाम। तस्यैव शूर इति प्रतिष्ठोपाधिसंज्ञया प्रसिद्धिः। तस्यैव तस्य शूरा परनाम्नो राजाधिदेवस्य तेऽष्टौ पुत्रा इष्यन्ते। तत्रापि वातनिवातइदवर्म्म निदान्तानां स्थाने दत्तः, अतिदत्तः, दण्डवर्म्मा, दण्डशत्रुरिति पठ्यन्ते। श्रविष्ठा श्रवणा चेति द्वे कन्ये च। तेन दशापत्यानि। अथवा भजमानस्यैव त्रयः पुत्रा इष्यन्ते। रथमुख्यः, विदूरथः, राजाधिदेव इति। तत्र विदूरथस्य शूरः पुत्रः। राजाधिदेवस्य तु दत्तनिदत्तादयोऽष्टौ पुत्रा द्वे कन्ये इत्येवं क्रमो द्रष्टव्यः। एतन्मते विदूरथ राजाधिदेवौ भ्रातरौ शूरशमिनौ चान्योन्यं भ्रातरौ। सुदंष्ट्रश्चान्धकाद् द्वादशो न त्रयोदश इति विशेषः। पाद्ममात्स्ययोस्तु राजाधिदेवस्य

शोणाश्वः, श्वेतवाहनः–इति द्वौ पुत्रौ। तत्र शोणाश्वस्य पञ्च पुत्राः–शमी, राजशर्म्मा, निर्मूतः, शत्रुजित् शुचिरिति पाद्मे। शमी, देवशर्मा, निकुन्तः, शत्रुजित् शुचिरिति मात्स्ये। रात्राधिदेव इति शूरस्यैव नामान्तरमित्येके। अथ स्वयं भोजस्थाने भोजो मात्स्ये। हृदिको हृदिक इत्युभयविधः पाठः। हार्दिक्यादिषु तु ह्रस्वेकार एव दृश्यते। हृदिकस्य दश पुत्राः–कृतवर्म्मा १, कृतवर्म्मा २, शतधन्वा, देवबाहुः ३, सुबाहु ४, भिषक् ५, श्वेतरथः ६, सुदान्तः ७, अधिदान्तः ८, कनकः ९, महाबलः १०,–इति ब्रह्माण्डे। अत्र देवबाहुप्रभृतीनां सप्तानां स्थाने—देवार्हः ३, नाभः ४, भिषणः ५, करम्भकः ३, अजातः ७, वनजातः ८, कनीयकः ९, इति सप्तमात्स्ये पठ्यन्ते। देवार्हः, सुभानुः, भीषणः, करधमः, अजातः, विजातः, करकः, इति सप्त पाद्मे। देवान्तः, नरान्तः, भिषक्, वैतरणः, सुदान्तः, अतिदान्तः, निकाश्यः, ,–इति सप्त ब्राह्मे। महाबलस्थाने कमदम्भश्च ब्राह्मे विशेषः। हरिवंशे तु "देवार्हश्च नरान्तश्च भिषग् वैतरणश्च यः। सुदान्तश्च विदान्तश्च कामदः कामदन्तकः।–" इति पठ्यते यत्तु देवर्षेर्वचनात्तस्य भिषग् वैतरणश्च यः। सुदान्तश्च विदान्तश्च कामदा कामदन्तिका"–इति पाठं प्रकल्पयन् हरिवंश टीकाकारश्च वनस्य वचनाच्छतधन्वनो भिषगादयश्चत्वारः पुत्राः कामदादिके च द्वे कन्यके इत्यर्थमभिप्रैति तत्तस्य प्रमादमात्रम्। इतरसर्ववंशग्रन्थविरुद्धत्वात्।

भगवते तु हृदीकस्य कृतवर्म्मा, शतधनु, देवबाहुरिति त्रय एव पुत्रा उक्तः। कृतवर्म्मणः पुत्रो बलिः। स श्रीकृष्णस्य जामातासीत्। स हि रुक्मिणी सुतायाश्चारुमत्याः पतिरासीत्। हृदिकपुत्रा हार्दिक्या उच्यन्ते। हार्दिक्येषु देवबाहुः, देवार्हः, देवान्तः, इत्येकोऽर्थः॥ कम्बलबर्हिः कम्बलबर्हिषः इत्येको–ऽर्थः। तस्यासमञ्जाः ततस्तमोजा इति मात्स्ये स्मर्य्यते। अन्यत्रतु वंशग्रंथेषु तमोजा न पठ्यते। तेषु कम्बलबर्हिषस्य द्वौ पुत्रौ–असमौजाः समौजाश्चेति पाद्मे। समौजसः स्थाने नासमौजा ब्राह्महरिवंशयोः। सुसमौजा ब्रह्माण्डे। असमौजसे त्वजातपुत्राय सुचन्द्र वसुरूपं च पुत्रं कृष्णः प्रददौ–इति ब्रह्माण्डे। अजातपुत्राय तस्मै सुदंष्ट्रं सुचारुं कृष्णं च तृतियं पुत्रं दत्तकत्वेन प्रददुः

केचिदिति ब्राह्मे। सुदंष्ट्रं चारुरूपं कृष्णमिति त्रयं हरिवंशे। सुदंशः सुवंशः कृष्ण इत्येते त्रयो दत्तकाः पाद्मे। मात्स्ये तु सुदंष्ट्रः सुनाभः, कृष्णइत्येते त्रयस्तमोजसः पुत्रा असमञ्जसः पौत्रा इत्युक्तम्। त एत सर्वे भजमानान्धका भोजा उच्यन्ते। कृतवर्म्मणः शतधन्वनश्च हार्दिकक्यस्य भोजत्वेन व्यपदेशोपलब्धेः॥ इत्येवं द्विशाखोज्यमन्धक वंशो

व्याख्यातः ॥ देवगर्भस्य पुत्रः शूरः इति वैष्णवे। कृतवर्म्मणः पुत्रः शूर इति कौर्म्मे। ऐक्ष्वाक्यामद्भुतमीढुषः शूरो जज्ञे इति पद्ममात्स्ययोः। वृष्णेर्मार्दयां युधाजिद्देवमीढुषौ जज्ञाते। तत्रास्य युधाजिद् भ्रातुर्देवमीढुषस्याशक्यां भार्य्यायां शूरोनाम पुत्रो जज्ञे इति ब्रह्माण्डे। हरिवंशेऽप्येवम्। देवमीढस्य शूरस्य भोजायां मारिष्यां मारिषायां वा पत्न्यां दश-पुत्राः पञ्चकन्याश्चाभूवन् यथा—

१ वसुदेवः	६ वत्सकः	१ पृथा
२ देवभागः	७ सृञ्जयः	२ श्रुतदेवा
३ देवश्रवस	८ श्यामकः	३ श्रुतश्रवा
४ आनकः	९ शमीकः	४ श्रुतकीर्तिः
५ कंकः	१० वृकः	४ राजाधिदेवीचेति

अथ शूरराजस्य पितृष्वस्रीयपुत्रः कुन्तिर्भोजः सखासीत्। तस्मै चापुत्राय सर्वप्रथमां सर्वज्येष्ठां पृथां नाम कन्यां दत्तकविधिना शूरः प्रददौ। तेनैषा पृथा कुन्तीतिप्रसिद्धाऽभूत्। तस्यां पाण्डुपत्न्यां युधिष्ठिरभीमार्जुनास्त्रयः कौन्तेया अभवन् पाण्डुविवाहात् प्रागेवानूढायां तस्यां कानीनः कर्णो जज्ञे। १। अथ श्रुतदेवायां कारूषस्य वृद्धशर्म्मणोऽसुरराजस्य पत्न्यां दन्तवक्रो नामासुरो जज्ञे। पुरात्वे क्षत्रियाणामसुरकुलेऽप्यविरोधेन विवाहादिसम्बन्धप्रथा प्रचरितासीत्। चन्द्रवंशीयानामनेकेषां तथा सम्बन्धस्मरणात् ॥ २ ॥ अथ श्रुतश्रवसि चेदिराजस्य दमघोषस्य पत्न्यां शिशुपालः सुनीथो जज्ञे ॥ ३ ॥ श्रुतकीर्त्यां तु कैकयराजस्य धृष्टकेतोः पत्न्यां सन्तर्दनचेकितानवृहत्क्षत्रादयः कैकेयाः पञ्चपुत्राः बभूवुः, भद्रानामैका कन्या च, सा श्रीकृष्णस्य वासुदेवस्य भार्य्याऽऽसीत् ॥ ४ ॥ अथ राजाधिदेव्यामावन्त्यौ विन्दानुविन्दौ जयत्सेनाज्जज्ञाते कन्या चैका मित्रविन्दा नाम, सा श्रीकृष्णस्य वासुदेवस्य भार्यासीत्। अथात्र हरिवंशे श्रुतकीर्तिस्थाने पृथुकीर्तिः पठ्यते।

करूषस्य दन्तवक्रस्यापि तस्यामेवोत्पत्तिः क्वचित्पाठे दृश्यते तल्लेखदोषात् ग्रन्थत्रुटिरिति चिन्त्यम् ॥ ५ ॥ त एते शूरस्य दौहित्रा वसुदेवस्य भागिनेया राजानो व्याख्याताः शूरपुत्रेषु त्वानकादयो भागवते, आनकस्थानेऽनाधृष्टिर्हरिवंश ब्राह्ममात्स्यब्रह्माण्डेषु। अष्टको वैष्णवे। अथ कंकस्थाने शिनिः पाद्ममात्स्ययोः। वृको ब्रह्माण्डे। ककुच्चक्रो

वैष्णवे। कनवको हरिवंश ब्राह्मयोः। वत्सकस्थाने ब्राह्म हरिवंशयोः नन्दनः पाद्ममात्स्यब्रह्माण्डेषु। वत्सधारको वैष्णवे। सृञ्जयस्थाने गृञ्जिमो ब्राह्महरिवंशयोः श्यामकः श्यामः इत्यविशेषः। अथ वृकस्थाने गण्डूषो हरिवंशब्राह्मवैष्णवब्रह्माण्डेषु। संपूय इति मात्स्यपाद्मयोः॥

एषां सन्ततिषु वंश वैद्यानां मतभेदा दृश्यन्ते तथाहि भागवते तावत् —वृकस्य दुर्वाक्ष्यां तक्षपुष्करशालादयः।

शमीकस्य सुमित्रायां सुदामन्यामर्जुनपालादयः
श्यामकस्य शूरभूम्यामौग्रसैन्यां हरिकेश हिरण्याक्षौ।
सृञ्जयस्य राष्ट्रपाल्या मौग्रसेन्यां वृषदुर्मषणादयः
वत्सकस्य मिश्रकेश्यामप्सरसि वृकादयः।
कंकस्य कर्णिकायामृतधामजयौ।
आनकस्य कंकायामौग्रसेन्यां सत्यजित् पुरुजितौ।
देवश्रवसः कंसवत्यामौग्रसेन्यां सुवीरेषुमन्तौ
देवभागस्य कंसायामौग्रसेन्यां चित्रकेतुबृहद्बलौ।

अथ ब्रह्माण्डे—गण्डूषायानपत्याय श्रीकृष्णः स्वपुत्रंचारुदेष्णं सुदेष्णं पुत्रत्वेन प्रददौ। चारुदेष्णं सुचारुं चेति हरिवंशे। शमीको भोजत्वं जुगुप्समानो विरक्तो वनं ययौ। श्यामोऽनपत्य एवास।

सृञ्जयस्य धनुः विरुजा इति द्वौ पुत्रौ नन्दनस्य रन्तिः रन्तिपाल इति द्वौ। वृकाय स्वपुत्राय वसुदेवः सौमिं कौशिकं पुत्रं ददौ। अनाधृष्टेरश्मक्यां श्राद्धदेवः। देवश्रवसः शत्रुघ्नः अथान्ये देवश्रवस एकलव्योऽभूत् पुत्रः। स निषादैः परिवर्द्धित्वान्नैषादिःपरिश्रुतः देवभागस्य महाभाग उद्धवो जज्ञे।

मात्स्येऽप्येवम्। क्वचिद्विशेषो यथा—सृञ्जयस्य धनुर्विराजौ। नन्दनस्य तन्तितन्तिपालौ। अनाधृष्टेरैक्ष्वाक्यां निधृतसत्वः शत्रुघ्नः तस्मा छ्राद्ध इति। देवभागस्य तृद्धवः पुत्र इति दिक्। ब्राह्मे तु गृञ्जिमस्य वीरोऽश्वहनुरिति द्वौ पुत्रौ। कनवकस्य तन्त्रिजः तन्त्रिपाल इति द्वौ। वत्सवते स्वपुत्राय श्रुतदेवात्मजातं नैषादिं निषादैः परिवर्द्धितमेकलव्यं नाम पुत्रं वसुदेवः प्रददावित्याह। हरिवंशेतु वत्सावते निरपत्याय वसुदेवः स्वमौ-

रसं पुत्रं कौशिकं प्रददावित्याह । गृञ्जिमस्य वीरोऽश्वहनश्चेति द्वौ पुत्रौ । कनकस्य तन्द्रिजस्तन्द्रिपाल इति द्वौ श्यामस्त्वनपत्य आसीत् । तस्य शमीको भ्रातैव पुत्रत्वं जगाम स शमीकस्तु श्यामराजमावहत् । किन्तु स भोजत्वाज्जुगुप्समानो राजसूयं कर्तुमारेभे । तमजातशत्रुर्युधिष्ठिरो नाशयामासेति विशेषः ।

अथ वसुदेवस्यानकदुन्दुभिरिति प्रतिष्ठा शब्दः । वसुदेवस्य त्रयोदश पत्न्यो द्वे चोपपत्न्यावित्येवं पञ्चदश स्त्रियोऽभूवन् । यथा—

१ रोहिणी (पौखी)	६ इला	११ शान्तिदेवा
२ मदिरा (इन्दिरा)	७ वृकदेवा	१२ सहदेवा
३ भद्रा (ताम्रा)	८ उपदेवा	१३ देवकी
४ श्रद्धदेवी (वैशाली)	९ श्रीदेवा	१४ सुगन्धी (सुतनूः)
५ रोचना (सुनाम्नी)	१० देवरक्षिता	१५ वनराजी (रथराजी)

अत्रेयं रोहिणी सर्वज्येष्ठा । सा पौखी पोखस्य वाह्लिकस्यानुजा भगिन्यासीत् । मदिरायाया इन्दिरा संज्ञा हरिवंशे पठ्यते । भद्रायास्ताम्रेति नामान्तरम् । श्रद्धदेव्यास्तु श्रद्धादेवी वैश्या वैशाखी वैशाली वैशल्या कौशल्यादि शब्दैर्व्यपदेशा दृश्यंते । भ्रमनिपतिता एवैताः संज्ञाः स्युः । अथवा सा कोशलदेशीया विशाला देशीया वा काचिद्वैश्या वा प्रतीयते । रोचनायाः सुनाम्नीति नामान्तरम् हरिवंशे सहदेवाया देवककन्याया नामान्तरमित्येके । सुगन्धीवनराज्योर्ब्रह्माण्डोक्तयोः स्थाने सुतनू रथराजीति पठ्यते मात्स्ये । वनराज्य वडवा संज्ञा हरिवंशे । इमे द्वे परिचारिके पाणिगृहीते आस्तां न तु विहिते पत्न्यावेति विशेषः ॥ वृकदेवाचस्तु सप्तैता दैवककन्याः कंसभगिन्यः स्युः । तास्वेतासु पञ्चदशसु भार्य्यासु वसुदेवस्य बहवः पुत्रा आसन् ते यथा—

(१) रोहिण्याम्—रामः, सारणः, शठः, दुर्दमः, दमनः, शुभ्रः, पिण्डारकः, कुशीतकः, इत्यष्टौ पुत्राः चित्रा नामैका कन्या चेति ब्रह्माण्डे । शुभ्रकुशीतकस्थाने सुभूमहाहनुरिति मात्स्ये, श्वभ्र उशीनर इति हरिवंशे । दुर्दमस्थाने दुर्म्मदो वैष्णव भागवतयोः । कृतसुभद्रभद्रबाहुभद्रभूतादयो द्वादश रोहिण्या भागवते । अस्य रामस्य रामभद्रो बलभद्रो

बलदेवो बलरामो बलः संकर्षण—इति नामान्तराणि इयं चित्रैव सुभद्रेत्याख्यायते चित्रा सुभद्रेति पुनर्विख्याता कुरुनन्दनेति हरिवंशे।

(२) मदिरायाम्—नन्दः, उपनन्दः, मित्रः, कुचिमित्रः, बलः, चित्रः, उपचित्रः, कृतकः, तुष्टिः, पुष्टिरिति दशपुत्रा ब्रह्माण्डे। कृतकस्थाने कृशूरो भागवते।

(३) भद्रायाम्—बिम्बः, उपबिम्बः, सत्यदन्तः, महोजा, इति चत्वारो ब्रह्माण्डे। उपनिधिमदादयो वैष्णवे सत्यदन्तस्थाने सहदेवो मात्स्ये।

(४) श्राद्धदेव्याम्—कौशिक एकः। श्राद्धदेव्या सह विहारे वने विचरन् वसुदेवः कौशिकं जनयमासेतिमात्स्ये। भागवते तु कौशल्यायां केशीत्याह। कौशल्याहीयं श्राद्धदेवीत्युक्तं प्राक्।

(५) रोचनायाम्—हस्तहेमांगदादयो भागवते सुनामायां वृकदेव गदौ हरिवंशे।

(६) इलायाम्—उरुवल्कादयो भागवते।

(७) सुगन्ध्याम्—पुण्ड्रः कपिलः, इति द्वौ पुत्रौ। तत्र पुण्ड्रो राजाऽऽसीत् कपिलस्तु वनं ययौ ॥

(८) वनराज्याम्—जरा नाम निषादोऽभूत् स प्रथमो धनुर्धर आसीत् सौभद्रौ भव इति द्वावन्यौ च वनराज्याः पुत्रावारताभित्याह मात्स्ये।

(९) वृकदेव्याम्—आगावहो नन्दकश्चेति मात्स्ये। विपृष्ट इति भागवते आगावहोऽगावहो ऽगावहो वा।

(१०) उपदेव्याम्—विजयः, रोचमानः, वर्द्धमानो, देवल इति चत्वारो मात्स्ये। कल्पवर्षादयो दशेति भागवते।

(११) श्रीदेव्याम्—मन्दकः, वसुः, हंसः, सुवंशः, इत्यादयः, षटपुत्रा भागवते।

(१२) देवरक्षितायाम्—उपासंग, वसु, गदादयो नवपुत्राः। सुभगा कन्यचेतिमात्स्ये।

(१३) शान्तिदेवायाम्—भोजविजयौ हरिवंशे। जनस्तम्बश्रमप्रतिश्रुदयस्त्वन्यत्र।

(१४) सहदेवायाम्—पुरुषविश्रुतादयोऽष्टौपुत्राः,।

(१५) देवक्याम्—सुषेणः, कीर्तिमान्, उदर्षिः, भद्रसेनः, ऋजुदायः, भद्रदेवः, विष्वक्सेनः, इति सप्तपुत्राः। सुभद्रा नामैका कन्या च सुभद्रा, कृष्णा, विष्वक्सेनः, कृष्ण इति व्यपदश्यते कृष्णावर्णत्वात्। सुभद्रायामर्जुनादभिमन्युरिति ब्रह्मांडे। उदर्षिस्थाने उदारुर्वैष्णवे। उदासी मात्स्ये; संमर्दनो भागवते ऋजुदायस्थाने ऋजुदासो वैष्णवे ऋष्टिमासो मात्स्ये। ऋजुर्भाग-

वते भद्रदेवस्थाने भद्रो भागवते। विष्वक्सेनस्य कृष्णो जनार्दनो गोविन्दो मुकुन्दोऽच्युतः पुरुषोत्तम इति नामान्तराणि। स इत्थं भागवते तोष्टूयते।

"भोजवृष्ण्यन्धक मधुशूरसेन दशार्हकैः
श्लाघनीये हितः शश्वत्कुरुसृञ्जयपाण्डुभिः ॥ १ ॥
स्निग्धस्मितं चितोदारैर्वाक्यैर्विक्रमलीलया।
नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ॥ २ ॥
यस्याननं मकरकुण्डलचारुकर्णं भ्राजत्कपोलसुभगं सुविलासहासम्।
नित्योसवं न ततृपु दृशुभिः पिबन्त्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ॥ ३॥

येषु गदोऽयं भद्राषुत्रो वैष्णवे। देवरक्षिता पुत्रो भागवते। सुनामा पुत्रो हरिवंशे विजयस्तूपदेवीपुत्रो मात्स्ये शान्तिदेवापुत्रो हरिवंशे। सुभद्रा देवकीकन्या ब्रह्माण्डे। सारणस्य सहोदरेति भागवते भारते हरिवंशे च। एवमन्येऽपि मतभेदाश्चिन्त्याः।

अथ वसुदेवस्य पौत्रा बलरामादीनां पुत्रा यथा—बलरामस्यरेवत्याम्-निशठः, उल्मुकः, पश्वी, पार्श्वमर्दी, शिशुः, सत्यधृतिः, मन्दबाह्यः, इति पुत्रा ब्रह्माण्डे। निशठो, विशठो, निशितो, निशयो, निषिध इति नामान्तराणि।

सारणस्य—सार्ष्टिः, मार्ष्टिः, शिशुः, सत्यः, सत्यधृतिरित्यादयः पुत्रा वैष्णवे। गिरिकः, गिरिः, शुक्लगुल्मः, अतिगुल्मः, दरिद्रान्तक इति पुत्राः अचिष्मती, सुनन्दा, सुरसा, सुवचाः, शतवला, चेति पञ्चकन्याश्चाभूवन् ब्रह्माण्डे शठस्य—भद्राश्वः, भद्रगुप्तिः, भद्रविष्टः, भद्रबाहुः, भद्ररथः, भद्रकल्पः, सुपार्श्वः, कीर्तिमान्, रोहिताश्व, इति नव पुत्राः। दुर्दमस्य—अभिभृत इत्येकः पुत्रः—इतोऽन्ये न स्मर्यन्ते।

अथ विष्वक्सेनस्य भगवतः श्रीकृष्णस्य द्वादश पत्न्यो बभूवुः—

१ रुक्मिणी	५ मित्रविन्दा	९ सुभामा
२ सत्यभामा	६ भद्रा	१० सुशीला
३ जाम्बवती	७ लक्ष्मणा	११ विजया
४ कालिन्दी	८ सत्या	१२ चारुहासिनी चेति

(भीष्मस्य?) तत्र रुक्मिणी वैदर्भी विदर्भराजस्य रुक्मिणः कन्यासीत्। सत्यभामा सत्राजितः कन्या जाम्बवती जाम्बवत ऋक्षराज कन्या तस्याश्चारुहासिनीति नामान्तर-

मित्येके। कालिन्दी कलिन्दराजस्य कन्या। मित्रविन्दा त्वावन्ती जयत्सेनस्यावन्तीपतेः कन्या। भद्रा केकयराजस्य धृष्टकेतोः कन्या। इमे भद्रामित्रविन्दे पितृष्वसुः पुत्रीत्वाद् भगिन्यावपि स्वयं वरणानुरोधात् कृष्णभार्ये बभूवतुः। राजकुले पुरोहित गोत्रेण विवाह प्रथायाः शास्त्रानुगृहीतत्वादीदृशः सम्बन्धे विवाहः प्रतिषिद्धो नासीदिति भाव्यम्। लक्ष्मणा लक्षणेत्येकोऽर्थः। इयं च गान्धारी मद्राधिपतेः कन्यासीत्। सत्यातु नाग्नजिती-नग्नजितः कन्या। तस्यानोला देवीति नामान्तरम्। सुभामा शैव्या। सुशीला माद्री। विजया कौशल्या। अथाक्रूरो वभ्रुरपि स्वां भगिनीमस्मै वसुदेवाय श्रीकृष्णाय प्रददौ। तास्वेता स्वष्टादश पुत्रा भागवते कथिता यथा—

१ प्रद्युम्नः	७ बृहद्भानुः	१३ श्रुतदेवः
२ अनिरुद्धः	८ चित्रभानुः	१४ सुनन्दनः
३ दीप्तिमान्	९ वृक	१५ चित्रबाहुः
४ भानुः	१० अरुणः	१६ विरूपः
५ साम्बः	१२ पुष्करः	१७ कविः
६ मधुः	१२ वेदबाहुः	१८ न्यग्रोधः

मत्स्ये तु रुक्मिण्यां—प्रद्युम्नः, चारुदेष्णः, सुचारुः, भद्रचारुः, सुदेष्णः, भद्रः, परशुः, चारुगुप्तः, चारुभद्रः, चारुहासः,-इति दश पुत्राः। चारुमती कन्या चेत्याहुः। सुदेवः, शरभः, चारुविधः, इत्यधिकं ब्रह्माण्डे। चारुवेषः चारुश्रवाः, चारुयशाः, इति लैङ्गे। सत्यभामायाम्—भानुः, भ्रमः, रोहितः, दीप्तिमान्, ताम्रः, चक्रः, जलन्धमः, इत्यष्टौ पुत्रः। चतस्रः कन्याश्चेति मात्स्ये। ब्रह्माण्डेतु भानुः, भानुः, अक्षः, रोहितः, मन्त्रविजरः, अन्धकः, सौभरेः, जरन्धरः, ताम्रः, चक्रः, इति पुत्राः। भानुः, सौभरिका, ताम्रपर्णी, जरन्धरा इति चतस्रः कन्याश्च पठ्यन्ते।

जाम्बवत्याम्—साम्बइतिमात्स्ये। ब्रह्माण्डेतु भद्रः भद्रगुप्तः, भद्रचित्रः, भद्रबाहु-रिति पुत्राः,। भद्रवती, संबोधनी चेति द्वौ कन्ये।

मित्रविन्दायाम्—मित्रवान्, मित्रविन्दश्चेति द्वौ।

सत्यायाम्—मित्रबाहुः, सुनीथश्चेति द्वौ। पुत्रौ मात्स्ये वृकः वृकाश्वः वृक-

जिदित्यधिकास्त्रयो ब्रह्माण्डे वृजिनी कन्या च ।

सुदेव्याम्—संग्रामजित् शतजित् सहस्रजिदिति त्रयो ब्रह्माण्डे अथायं प्रद्युम्नो रुक्मिणो दौहित्रो रुक्मिणः पौत्रीं रुक्मवतीं भार्यार्थे परिजग्राह तस्यां वैदर्भ्यामनिरुद्धो जज्ञे । अथनिरुद्धोऽपि रुक्मिण एव पुत्रीं सुभद्रामुपयेमे । तस्यामस्य वज्रः पुत्रोऽभूत् वज्रः संक्षिप्तः इति मात्स्ये । वज्रात् प्रतिबाहुः । तस्य सुचारुर्वैष्णवे सुबाहुर्भागवते । सुबाहोः शान्तसेनः । ततः शतसेनः, इति भागवते ॥ अथ साम्बस्य काश्यायां सुपार्श्वकन्यायां पञ्चपुत्राबभूवुरिति मात्स्ये ।

संख्यानां यादवानां कः करिष्यति महात्मनाम् ।
यत्रायुतानां मयुत लक्षेणास्ते सदाहुकः ॥ १ ॥
नह्येतस्मिन् कुले जाता अधुना अबहुप्रजाः ।
अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥ २ ॥
यदुवंश प्रसूतानां पुंसां विख्यातकर्मणाम् ।
संख्या न शक्यते कर्तुमपि वर्षशतैर्नरैः ॥ ३ ॥

॥ इति यदुवंश मातृका संपूर्णा ॥

अथ यदुवंशानुक्रमणी

यदुवंशीयानां दाशार्हाणां हैहयतालजङ्घ मधुभोजान्धकवृष्णि भेदैर्बहुधा विभक्तानां राजांशस्य भोज इत्यौपाधिकी संज्ञा। एकदशाधिपतयो राजानो भोजशब्देनाख्यायन्ते इति केचित्। इमे यदुवंशीया दाक्षिणात्याः। समस्तभारतवर्षाधीश्वरेण ययातिना स राजा दक्षिणापथस्य यदवे प्रदानात्। तेनैतद्वंशधराणां दक्षिणस्यामेव शुक्तिमत्यां मृतिकावत्यां माहिष्मत्यां वा तत्र राजधानीं संनिवेशा आसन्। अथ कालक्रमेण शूरसेना मथुरायां न्यवसन्। तत आरभ्यैतस्य भोजवंशस्य पूर्वं मथुरा राजधान्यासीत्। पश्चात्तु द्वारका भवत्। तस्यैतस्य भोजराजवंशस्य कुकुरान्धकिशाखस्य वंशानुक्रमणी यथा—

१	यदुः	१९	क्रथः	२७	कुरुवंशः
२	क्रोष्टा	२०	कुन्तिः	२८	अनुः
३	वृजिनीवान्	२१	धृष्टिः	२९	पुरुहोत्रः
४	स्वाहिः	२२	सृष्टिः	४०	अंशुः
५	कुशाङ्कः	२३	निधृतिः	४१	सत्वान्
६	चित्ररथः	२४	विदूरथोद्वाहः	४२	सात्वतः
७	शशविन्दुः	२५	व्योमः	४३	अन्धकः
८	पृथुश्रवाः	२६	जीमूतः	४४	कुकुरः
९	पृथुतमः	२७	विकृतिः	४५	वृष्णिः
१०	सुयज्ञः	२८	भीमरथः	४६	धृतिशूरः
११	उशनाः	२९	नवरथः	४७	कपोतरोमा
१२	शितेषुः	३०	दशरथः	४८	विलोमतित्तिरिः
१३	मरूतः	३१	शकुनिः	४९	अनुः
१४	कम्बलबर्हिः	३२	करम्भः	५०	अभिजित्
१५	रूक्मकवचः	३३	देवरातः	५१	पुनर्वसु
१६	परावृत्	३४	देवक्षत्रः	५२	आहुकः
१७	ज्यामघः	३५	देवनः	५३	उग्रसेनः
१८	विदर्भः	३६	मधुः	५४	कंसश्चेति

अथ हैहयवंशानुक्रमणी यदुत एव पृथग् भवति तद्यथा—

१ यदुः	६ धर्मनेत्रः	११ दुर्दमः	१६ तालजंघ
२ सहस्रजित्	७ कुन्तिः	१२ कनकः	१७ वीतिहोत्रः
३ शतजित्	८ साहंजः	१३ कृतवीर्य्यः	१८ अनर्हः
४ हैहयः	९ महिष्मान्	१४ अर्जुनः	१९ दुर्जयः
५ धर्मः	१० भद्रसेन्यः	१५ जयध्वजः	२० सुप्रतीकश्चेति

अथ मर्तिकावतक भोजानां विदर्भादष्टादशात् पूर्व्याः कुकुरान्धकवत् ॥ उत्तरास्तु पृथग् भवन्ति ते विदर्भादयः पञ्चदश यथा—

१८ विदर्भः	११ धतिः	२४ कौशिकः	२७ श्येनिः	३० बृहन्मेधाः
१९ रोमपादः	२२ श्वेतः	२५ सुगन्तः	२८ द्युतिमान्	३१ श्रीदेवः
२० बभ्रुः	२३ विश्वसहः	२६ अनलः	२९ वपुष्मान्	३२ वीतरथश्चेति

अथ कुकुरान्धकवद् भजमानान्धकशाखस्याप्यनुक्रमणीद्रष्टव्या ॥ तत्रसात्वतो-द्विचत्वारिंशः। सात्वतान्धकतः पूर्व्वेषु पुरुषेषु कुन्तिवत्। उत्तरेतु सात्वतादयश्चतुर्दश यथा—

४२ सात्वतः	४५ विदूरथः	४८ प्रतिक्षत्रः	५१ देववाहः	कृतवर्माशतधन्वा ५४ तमोजाः
४३ अन्धकः	४६ शूरः	४९ स्वयंभोजः	५२ कम्बलबर्हिषः	५५ सुदंष्ट्रश्चेति
४४ भजमानः	४७ शमी	५० हृदिकः	५३ असमञ्जाः	× × ÷ ÷ ÷

उक्ते द्वे अन्धकशाखे। अथातस्तिस्रो वृष्णिशाखाः। तासु द्विचत्वारिंशत् सात्वतात् पूर्व्याः कुकुरान्धकवत्। उत्तरास्तु निघ्नशाखायां सात्वतादयोऽष्टौ यथा—

४२ सात्वतः	४४ युधाजित्	४६ निघ्नः	४८ भङ्गकारः
४३ वृष्णिः	४५ अनमित्रः	४७ सत्राजित्	४९ शत्रुघ्नश्चेति।

शैनेयशाखायां सात्वतादयो दश यथा—

४२ सात्वतः	४४ युधाजित्	४६ शिनि	४८ युयुधानः	५० कुणिः
३३ वृष्णिः	४५ अनमित्रः	४७ सत्यकः	४९ असङ्गः	५१ युगन्धरश्चेति

पृष्णि शाखायां सात्वतादयो दश यथा—

४२ सात्वतः	४४ युधाजित्	४६ वृष्णिवभ्रुः	४८ जयन्तः	५० अक्रूरः
४३ वृष्णि	४५ अनमित्रः	४७ वृषभः	४९ सदायज्ञः श्वफल्कः	५१ देववाश्चेति

अथ क्रूरशाखाया देवमीढाः सात्वतादयश्चतुर्विंशतिः यथा—

४२ सात्वतः	४८ प्रद्युम्नः	५४ वृहद्भानुः	६० श्रुतदेवः
४३ वृष्णिः	४९ अनिरूद्धः	५५ चित्रभानुः	६१ सुनन्दनः
४४ देवमीढुषः	५० दीप्तिमान्	५६ वृकः	६२ चित्रवाहुः
४५ शूरः	५१ भानुः	५७ अरूणः	६३ विरूपः
४६ वसुदेवः	५२ सामः	५८ पुष्करः	६४ कविः
४७ श्रीकृष्णः	५३ मधुः	५९ वेदवाहुः	६५ न्यग्रोधरथेति ॥

एवमितरा अपि वंशानुक्रमण्यो वंशमातृकातो यथा यथं कल्प्या इति दिक् ॥

॥ इति यदुवंशानुक्रमणी ॥

———

॥ श्रीः ॥

★ शुद्धिपत्रम् ★

पृष्ठ	पंक्ति	अशुद्ध पाठाः	शुद्ध पाठाः
१	१६	इल	इलाः
२	४	कोष्टा	क्रोष्टा
६	३	यथान्यस्यां	मथान्यस्यां
६	२०	तापसी	तापसौ
७	११	सुव्रती कात्मजोः	सुप्रतीकात्मजो
,,	१७	जगमा	जगामा
९	२५	सुव्रता	सुव्रता
११	३	षूथु कीर्तिः	पृथुकीर्तिः
,,	७	पृथुकीर्ति	पृथुकीर्तिः
,,	१०	ब्रह्मा-मात्स्या	ब्राह्ममात्स्य
१५	९	देवना	देवनो
,,	११	लैङ्गे:	लैङ्गे
,,	१३	कौर्म्मे:	कौर्म्मे
,,	१५	वैदभ्यां	वैदर्भ्यां
,,	१६	पुरुद्वहो	पुरूद्वहो
,,	१९	सतन्न स्म र्यवते	सत्वान्न स्मर्यते
,,	२१	रोद्धा	ऐद्धा
,,	२२	सत्व	सत्वः
,,	२३	पतत्सत्वतोर्वै	पुरुद्वत् सत्वतोर्वै
१६	१	न्यायत्वादिदं	न्याय्यत्वादिदं
,,	३	पुरवसुस्तथा	पुरुवसुस्तथा
,,	१६	ज्यामघवंशे	ज्यामघवंशे
,,	१७	तनुरोधेनायं	तदनुरोधेनायं
१७	१	रेव	रेवो
,,	६	वाह्यकाया	वाह्यकायां
,,	१५	नतः	नातः
,,	१६	वशः	वंशः
,,	१८	नघाः	नद्याः

पृष्ठ	पंक्ति	अशुद्ध पाठाः	शुद्ध पाठाः
१८	१४	दत्रादौ	तत्रादौ
”	२०	षष्ठत्वापौ	षष्ठत्वाप्तौ
१९	३	धाराणां	धराणां
”	१३	इत	इति
”	२३	व्रतत्यां	व्रतवत्यां
२०	१०	दियं	दिव्यं
”	१८	षाप	प्राप
”	२५	वृष्ण्मन्धंकाः	वृष्ण्यन्धकाः
२१	१०	दृष्ट	दृष्टः
”	१६	मारादीस्तव	मा रोदीस्तव
”	१८	आपश्यं जामवन्तं	अपश्यज्जामवन्तं
२२	१४	मनि	[illegible]
२३	२४	पवन	पवनं
२४	९	सकवच	सकवचं
”	१६	बलदेवाद प्रवान्	बलदेवा दवाप्तवान्
२५	८	कालात्ययोः	कालात्ययो
२६	६	सत्वत	सत्वतः
”	२४	श्वकक शाखा	श्वफल्कशाखा
२७	१३	षुत्र	पुत्र
२८	१०	शत्रुघ्न	शत्रुघ्नः
”	१२	धर्मधृक	धर्मधृक
”	१८	सुधारकन्या	सुधाराकन्या
२९	२	प्रतिवाहवः	प्रतिवाहवः
”	४	स्वफल्कस्य	श्वफल्कस्य
”	९	व्रह्मे	व्राह्मे
”	१२	स्वफलकस्य	श्वफल्कस्य
”	१५	आश्ववाहुः	अश्वबाहु
”	१६	व्राह्मयोः	व्राह्मयोः
”	२५	वर्हिषः	वर्हिषः
३१	१	सुवाहु	सुवाहु
”	५	तस्थाथ	तस्याथ
”	१४	घोपाणां	घोषाणां
३२	३	सदेबा	सदेवा

३२	३	वैष्णव	वैष्णव
	१५	शङ्कुः	शङ्कुः
,,	२८	कङ्क	कङ्क
३३	४	पञ्च	पञ्चा
,,	९	रिंश	रिंशे
,,	१४	देवबाहु	देवबाहु
,,	२६	द्वदशो	द्वादशो
३४	१५	म्नन्थ	ग्रन्थ
,,	१६	शतधनु	शतधनुः
,,	१७	श्चरू	चरु
,,	२५	भोजसः	मोजसः
३५	८	देवश्रवस	देवश्रवसः
३७	१३	देव्या	देव्या
,,	१७	नामाल्तर	नामान्तर
३८	२	पुनर्विख्याता	पुनर्विख्याता
,,	१४	वारता	वास्ता
,,	२३	किर्तिमान्	कीर्तिमान्
,,	२४	व्यपदृश्यते	व्यपदिश्यते
३९	२	तोष्टूप्यते	तोष्टूय्यते
,,	१६	अचिष्मती	अर्चिष्मती
,,	३६	ऋक्षराज	ऋक्षराज एव
४०	४	अथ	अथा
,,	८	संख्यानां	सख्यानं
४२	२	इत्यौपाधि	इत्योपाधिकी
,,	८	यदुः	यदुः
,,	१३	विदरथो	विदूरथो
,,	२१	वर्हि	बर्हिः
,,	२२	पुनर्वसु	पुनर्वसुः
,,	२४	ज्यामघः	ज्यामघः
४३	२	तालजंघ	तालजंघ्यः
,,	८	धतिः	धृतिः
,,	२१	शिनि	शिनिः
,,	२५	वभ्रुः	बभ्रुः
,,	२६	वृष्णि	वृष्णिः

मुद्रक—
श्याम प्रेस
टिक्कड़मल का रास्ता, जयपुर